कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्री. वे. घाटे शास्त्री.

॥ भावनानिर्णय प० ५९

Acc. NO. ~~3220~~ M-1782
Title - ब्रह्मभावनानिर्णय. (= भावनानिर्णय.)
Author - पूर्णेन्द्र सरस्वति (वासुदेवेन्द्र सरस्वती शिष्य)
Date - ?
Subject - तत्त्वज्ञान, वेदान्त.
folio - 59.
Xerox - 118

KKSU LIBRARY RAMTEK 441 106 M-1782 Dist. Nagpur

Checked 2012

॥१॥ ॥ श्रीगुरुगङ्गापतिर्जयति ॥ प्रणिपत्य महेशानमुमां विघ्नं गुरूनपि ॥ भावना
निर्णयं कुर्वे प्रीत्यर्थं परमेष्ठिनः ॥१॥ ब्रह्मभावना द्विविधा ऽमूर्त्तब्रह्मविषयि
णी मूर्त्तब्रह्मविषयिणी चेति ॥ अमूर्त्तब्रह्मविषयिणी च द्विविधा निष्प्रपञ्चब्रह्म
विषयिणी सप्रपञ्चब्रह्मविषयिणी चेति ॥ निष्प्रपञ्चब्रह्मविषयिणी च द्विविधा मायो
मूर्त्तामूर्त्तप्रपञ्चवैशिष्ट्याऽविषयत्वे सति मायाशक्तिविशिष्टपरमकारणविषयि
णी कृत्स्नप्रपञ्चवैशिष्ट्याविषयिणी चेति ॥ आद्यब्रह्मभावनायां तु तत्सर्वव्यापकं
चित्तमाकृष्य व्योम्नि धारयेत्तत्स्वस्य रूपमशरीरोहोन किंचिदपि चिंतयेदिति भागव
तवचनं प्रमाणं ॥ अस्यायमर्थः ॥ सर्वत्र शंखचक्राद्युपलक्षितपरमात्मविग्रहधा ॥१॥



रणोत्कालदनंलरंच सर्वावयवेभ्यः प्रत्याहृत्य मनः सस्मिलं भावयेत्सुखमितिमुख
मात्रविषयिणीधारणोत्कालदुत्तरेणानेनश्लोकैनललोप्यावरुष्यव्योमशाब्दवाद्दि
तमायान्वच्छिन्नेलयाभिणिधारणोत्का॥ एलदुक्तंभवलिविग्रहाद्यूपलक्षितंप्रपं
चंव्योमशाब्दार्थभूलमायिनीश्वरेप्रविलाप्यमायांचनिर्विशेषचिन्मात्रेऽसरे
ब्रह्मणिविलाप्याखंडैकरसंचिन्मात्रंभावयेदिलि॥ तस्यसत्कामदारोहोलर्कि
चिदपिचिंतयेदित्यनेनोक्तं॥ सन्त्सप्रपंचवैशिष्ट्याविषयिणीचब्रह्मभावना
त्रिविधा॥ प्रपंचायवारेनब्रह्ममात्रविषयिणीविलापितप्रपंचब्रह्मविषयिणी
प्रपंचान्यब्रह्मविषयिणीचेलि॥ तत्रप्रपंचायवादोनामब्रह्मव्यतिरेकेणप्रपं

ञ्चाभाव॥ स्तथाच ब्रह्मव्यतिरेकेण कालत्रयेपि प्रपंचाभावनिश्चयेन चिन्मात्रविष
यिणी प्रथमा॥ तथाच श्रुतिः मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन मृत्योः स मृत्यु
माप्नोति य इह नानेव पश्यति एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवं॥ तथाश्च छ
ऽमन एव द्रष्टव्यमित्यादि यत्तदद्रेश्यमग्राह्यमिति च यस्मिन्सर्वाणि भूतानीत्यादि च॥
तथा शैवे वायवीयसंहितायां मन्त्रयोगः स्पर्शयोगो भावयोगोऽभावयोगो महा
योगश्चेति पन्चधा योगं विभज्याभावयोगस्य विलीनावयवं विश्वरूपं संभाव्य
ते यत इत्यादिना प्रपंचाभावविशिष्टब्रह्मविषयत्वमुक्त्वा शिवस्वभाव एवे
कृत्स्नं स्यते निरस्याधिकः॥ यथा सैव मनोत्पत्तिर्महायोग इहोच्यत इति श्लोकेन ॥२॥

भावाभावात्मकप्रपंचवैशिष्ट्याविषयकनिरुपाधिकशिवभावनाप्रदर्शिता॥
तथाहि वायवीयसंहितायां श्रूयते॥ निरुद्धवृत्त्यंतरस्य शिवे चित्तस्य निश्चला॥
या स्थितिः सा समासेन योगः स खलु पंचधा॥ मंत्रयोगः स्पर्शयोगो भावयोग
स्तथापरः॥ अभावयोगः संप्रोक्तो महायोगः परो मतः॥ मंत्राभ्यासवशेनैव मं
त्रवाच्यार्थगोचरा॥ या स्थितिर्मानसी सैव मंत्रयोग उदाहृतः॥ या प्राणायामस
हा सैव स्पर्शयोगोभिधीयते॥ स मंत्रस्पर्शनिर्मुक्तो भावयोगः प्रकीर्त्तितः॥ वि
लीनावयवं विश्वं रूपं संभाव्यते यतः॥ अभावयोगः संप्रोक्तो न वस्तुनामभा
वतः॥ शिवस्वभाव एवैकश्चिंत्यते निरुपाधिकः॥ यया सैव मनोवृत्तिर्महायो

॥३॥ गइहोच्यते॥ दृष्टे तथानुश्रविके विरक्तं विषये मनः॥ यस्य तस्याधिकारोस्ति यो
गे नान्यस्य कस्यचिदिति॥ तथा क्रोमे योगस्तु प्रथमो ज्ञेयो ह्यभावो मुनिसत्तमाः॥
अपरस्तु महायोगः सर्वयोगोत्तमोत्तमः॥ शून्यं सर्वं निराभासं स्वरूपं यत्र चिं
त्यते॥ अभावयोगः संप्रोक्तो येनात्मानं प्रपश्यति॥ यस्मात्पश्यति चात्मानं नित्या
नंदं निरंजनं॥ सध्येवय संस्थितो योगो भाषितः परमः स्वयं॥ येचान्ये योगिनां योगाः
श्रयंते ग्रंथविस्तरैः॥ सर्वेते शिवयोगस्य कलां नार्हंति षोडशीमिति॥ प्रपंचवि
लायते वअस्तभावनानामस्थूलत्वाद्युपादेयं स्वस्वोपादाने विलीनमिति तन्निष्ठध्वं
सप्रतियोगीजिभावयित्वा तदपि सर्वोपादानेऽव्याकृते विलीनमिति भावयित्वात ॥३॥

6

स्वजीवे विलीनमितिभावयित्वा तं च परमात्मविलीनमितिभावयित्वा प्रलीनं निरिव
त्तचिदचित्प्रपंचमात्मचिंतनं ॥ तथा चोक्तं भागवते ॥ विज्ञानात्मनि संयोज्य क्षे
त्रज्ञे प्रविलाप्य तं ॥ ब्रह्मण्यात्मानमाधाय घटांबरमिवांबर इति ॥ तत्रैव प्रदेशांत
रे ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदेपदे परं पदं वैष्णवमाम
नंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ त एतदभिगच्छंति विष्णोर्यत्परमं पदं ॥
अहं ममेति दौरात्म्यं न येषां देहगेहजं ॥ दक्षस्मृतिश्च ॥ प्रकृतिं पुरुषे न्यस्य पुरुषं
प्रकृतिं न्यसेत् ॥ अहं ब्रह्म परं चेति प्रसंख्याय विमुच्यत इति ॥ अभियुक्तोक्तिरपि
विलाप्य प्रकृतिं कृत्स्नां संभवव्यत्ययक्रमात् ॥ अवशिष्टं तु सन्मात्रं चिदानंदं विचिं



॥४॥ लयेदिति ॥ तथा तापनीयश्रुतिरपि ॥ मात्रा मात्राः प्रतिमात्राः कुर्यादिति ॥ अस्या
यमर्थः ॥ विश्ववैश्वानरात्मिकामकारमात्रां तैजसहिरण्यगर्भात्मकोकारमात्रा
यां प्रविलाप्य तां च प्राज्ञेश्वरात्मिकायां मकारमात्रायां प्रविलाप्य तां च प्रणवस्य
स्थावस्थारूपायामलऽवलम्बलिङ्गलायामर्द्धमात्राशब्दशब्दितायां सबिंदु
कूनादरूपायामकारादिमात्रात्रयार्थोत्तीर्णतुर्यब्रह्मरूपायां विलापयेदिति मा
त्राशब्दो वर्णपरः ॥ अर्द्धमात्रात्मकस्य नादस्याकारादिवर्णत्रयात्मकप्रणवप्रकृ
तित्वं भागवते श्रूयते ॥ समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ॥ हृदाकाशाद
भूनाद इति प्रस्तूय ततोऽभूत्त्रिपदोंकार इति एतेन अकारः प्रणवप्रकृतिरिति ॥४॥

पस्तोनिरस्तः तापनीयएव तदुत्तरखंडे कृतायां मात्रामात्राः प्रतिमात्राः कृत्वा ओतानु
ज्ञात्रनुज्ञात्रविकल्परूपं चिंतयन्ग्रसेदिति मात्रामात्राः प्रतिमात्रेत्यंतं व्याख्यातं अव
श्लिष्टस्यायमर्थः॥ तैरवर्यवस्य तुरीयप्रणव ओतद्राद्यर्थस्तस्यार्थः॥ ओतं ब्रह्मम
कारवाच्यमात्रा सोषुप्तिकजीवात्मेमुक्तेश्वरोपाभिन्नतेक्षणाविद्धीपविस्वापन्ना
कार्योन्मुखाया प्रकृतिः सा बहिर्मुखेत्युच्यते॥ सैव विदित्तेक्षणाविद्धीपविस्वापकार्य
नुन्मुखा स्वप्रलीनस्थूलसूक्ष्मप्रपंचाप्रलयानस्थाया प्रकृतिः सांतर्मुखेत्युच्य
ते तस्यामधिष्ठानभावेनाचितं यद्वस्तु तदोतमित्युच्यते॥ तथा च तैरवर्याख्यं तुरी
यं प्रणवमनुसंदधानो मायाख्या प्रकृतिर्ब्रह्माधेयतया ब्रह्मपरतंत्रा न स्वतंत्रे



॥५॥

तिभावयेत्॥ मध्यमाख्यस्तुरीयप्रणव अनुज्ञातृशब्देनोच्यते॥ तस्यार्थ अनुज्ञातृब्र
ह्म प्रागुक्तमायाया अस्वतंत्रायाः स्वतःसत्तास्फूर्तिशून्यायाः स्वकीयसत्तास्फूर्तिभ्यां
सती स्फुरतीति व्यवहारविषयत्वाभ्यनुज्ञातृ ब्रह्मानुज्ञातृशब्देनोच्यते॥ तथा चतुरी
यं मध्यमाख्यप्रणवमनुसंदधानो नास्ति मायायां ब्रह्मतुल्या पारमार्थिसत्ता किंतु पर
मार्थेति भावयेत्॥ अनुज्ञातृप्रणवो नाम पश्यंतीरूपतुरीयप्रणवः प्रागुक्ताया मायाया
अस्वतंत्राया अपरमार्थ्या अधिष्ठानातिरिक्तस्वरूपत्वाभ्यनुज्ञातृ ब्रह्म अनुज्ञातृ
शब्देनोच्यते॥ तथा च पश्यंत्याख्यतुरीयं प्रणवमनुसंदधानः प्रागुक्तमायाया ब्र
ह्मस्वरूपातिरेकेण स्वरूपशून्येति भावयेत्॥ अविकल्पप्रणवो नाम पराशब्दवा

॥५॥

च्चरत्तरीयप्रणवः॥भावाभावप्रपंचविनिर्मुक्तमक्षरं परं ब्रह्माविकल्पप्रणवार्थस्तथा
चाविकल्पप्रणवमनुसंदधानो भावपपंचवदेवमायामात्राभावोप्यधिष्टानव्यतिरेकेण
नेतिभावयेदेषएवाविकल्पप्रणवार्थः॥ नांतःप्रज्ञं अथात आदेशो नेतिनेतीतिवाक्यैः
प्रतिपाद्यते॥ इत्थंच स्थूलसूक्ष्मोपाधिप्रविलापनद्वारेण ब्रह्मभावना त्रिदंडिनां ध्या
ननिरूपणप्रस्तावे प्रदर्शिता भद्र भास्करेण॥ जपकाले च वाकारहकारलोपेन सो
हमित्यर्थं चिंतयन्नू जपेत्॥ अथ वा विराडाख्यस्थूलमहाभूतलयं हकारार्थं स
काराख्यहिरण्यगर्भाख्यसूक्ष्ममहाभूतलयरूपे लीनं तच्च मूलकारणे परे ब्रह्मणि ॐ
काराख्ये लयं नादाख्ये शुद्धब्रह्मणि तच्च शुद्धचिन्मात्रं ब्रह्माहमस्मीति चिंतयन्नू
जपेत्॥ अष्टाक्षरो विष्णुर्भास्वदिस्त्रादि ध्यायेदित्युक्तदाहतलक्ष्यनुसारान्नयन्नेतिने

तीयतदुत्तरस्टस्सव इति भागवतवचनानुसारेऽचस्यन्तोच्चपुरुषस्तिस्रो मात्राः प्रकी
र्तिताः ॥ अर्धमात्रापरं ब्रह्म ध्येयं ध्यायन्मोक्षकांक्षिभिरिति मार्कंडेयपुराणवचनं ॥
प्रधानपुरुषव्यक्तकालानां परमं हि यत् ॥ पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं प
दमिति विष्णुपुराणवचनं च ॥ अत्तोऽद्विप्रपंचविलापिन ब्रह्मणो ध्येयत्वज्ञेयत्व
योः प्रदिपादनपरमिति व्याख्येयं ॥ प्रपंचान्यब्रह्मभावनानाम शारीरेंद्रियादिभ्यो
भिन्नत्वेन विशिष्टतस्य प्रत्यगात्मनः ब्रह्मत्वभावना ॥ तथा च भारते ॥ द्वाद्वांदशेभ्य
स्तत्वेभ्यः ख्यातो यः पंचविंशकः ॥ विवेकात्केवलीभूतः षड्विंशमनुपश्यतीति चतु
र्विंशतितत्वेभ्यो विवेचितस्य जीवस्य षड्विंशोश्वरात्मतया भावतया स्वात्मत्वेनं ष
ड्विंशमनुपश्यत्यर्थः ॥ तथा च भगवद्गीतायां ॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञान ॥६॥



चक्षुषा॥ भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं॥ इति महाभारतादिष्टयं तस्य
क्षेत्रस्य क्षेत्रज्ञस्य चांतरं भेदं इत्या वत्यर्थः॥ तथा चानेन देहादिभ्यो भिन्नत्वेन
निर्णीतस्य क्षेत्रज्ञस्य क्षेत्रज्ञं चापि मां विद्धीत्यादिवचनानुसारेण ब्रह्मात्मक
त्वेन साक्षात्कारस्य मोक्षहेतुत्वे स्थिते आत्मसंस्थं मनः कृत्वा न किंचिदपि चिं
तयेदिति वचनेन तद्धेतुत्वेनावगतात्मभावना देहादिभ्यो भिन्नत्वेन निर्णीत
स्यात्मनो ब्रह्माभेदविषयिणीत्यवगम्यते॥ तत्रैवेन्द्रियाणि पराण्याहुरिन्द्रिये
भ्यः परं मनः॥ मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ एवं बुद्धेः परं बुद्ध्वा सं
स्तभ्यात्मानमात्मना॥ जहि शत्रुं महाबाहो कामरूपं दुरासदमित्येतास्तिस्रोपि
भावनाः स्कांदादि स्फुटं प्रदर्शिताः॥ नाहं देहो न च प्राणो नेन्द्रियाणि तथैव च॥

न मनोहं न बुद्धिश्च नैव चित्तं महं स्मृतिः ॥ नाहं पृथ्वी न सलिलं न च वह्निस्त
थानिलः ॥ न चाकाशो न शब्दश्च नैव स्पर्शस्तथा रसः ॥ न च गंधो न रूपं च न मा
याहं न संसृतिः ॥ सदाहं साक्षिरूपत्वाच्छिवऽवास्मि केवलः ॥ इति धीर्या मुनिश्रे
ष्ठा सा समाधिरिहोच्यते ॥ अथवा पंचभूतेभ्यो जालमंडं महामुने ॥ भूतमात्र
तया दृष्ट्वा विवेकेनैव बुद्धिना ॥ पुनः स्थूलानि भूतानि सूक्ष्माभूतात्मना तथा ॥
विलाप्यैव विवेकेन ततस्तान्यपि बुद्धिमान् ॥ मायामात्रतया दृष्ट्वा मायां च प्र
त्यगात्मना ॥ सोहं ब्रह्म न संसारी न मत्तोन्यत्कदाचन ॥ इति विद्यात्स्वमात्मानं सा
स समाधिः प्रकीर्तितेत्यत्र नाहं देह इत्यारभ्य अथवेत्यंतेन प्रपंचविन्यासभा
वना दर्शिता ॥ अथवेत्यनेन प्रपंचविलापनेन ब्रह्मभाव दर्शिता ॥ अथवा

योगिनांध्येयःप्रणवात्मानमीश्वरं ॥ वर्णत्रयात्मनाविद्यादकारेणक्रमेणतु ॥
ऋग्वेदोयमकाराख्यउकारोयजुरुच्यते ॥ मकारःसामवेदाख्यनादस्त्वाथर्वणी
श्रुतिः ॥ अकारोभगवान्ब्रह्मातथोकारोहरिःस्वयं ॥ मकारोभगवान्रुद्रस्त
थानादस्तुकारणं ॥ अग्नयश्चत्रयोलोकाश्चवस्थावसथास्त्रयः ॥ उदात्तादि
स्वराःकालाएतेवर्णत्रयात्मकाः ॥ इतिज्ञात्वापुनःसर्वमक्षरत्रयमात्रतः ॥
विलाप्याकारमद्वंद्वमुकाराख्येविलापयेत् ॥ उकारंचमकाराख्येतथानादेम
कारकं ॥ तथामायात्मनानादंमायांजीवात्मरूपतः ॥ जीवामीश्वरभावेनविद्या
त्सोहमितिध्रुवं ॥ एषाबुद्धिश्चविद्वद्भिःसमाधिरितिकीर्तितेति ॥ नादस्त्वाथ
र्वणीश्रुतिरित्यत्रनादशब्देनसबिंदुकोनादःयावसानेस्यचतुर्थ्यर्धमात्रेति

॥८॥

श्रुतिप्रतिपाद्यार्धमात्रारूपो दर्शितः॥ अस्यायमर्थः॥ यावसाने अकार उका
रमकारादीनामवसाने श्रूयमाणा अकारादिमात्रात्रयापेक्षया चतुर्थी मात्रा
वर्णः अनुस्वारापरपर्याये बिंदुशब्दवाच्यबिंदुसहकृतनादः नादसहकृतबिं
दुरूपो वा चतुर्थो वर्णः अर्द्धमात्रा या अर्द्धमात्रा अर्धपिप्पलीयादिवत् अर्द्ध
नपुंसकमिति समासः॥ तथा च बिंदुनादात्मकस्य चतुर्थवर्णस्य नादापे
क्षया अर्धोनणः अनुस्वारात्मको बिंदुः बिंद्वपेक्षया अर्द्धो नादः अर्धमात्रा
पूर्वतापनीयदीपिकाकारास्तु वदंति या प्रसिद्धा ब्रह्मविदां अवसाने तस्य प्र
णवस्य चतुर्थश्चतुर्थसंख्यापूरणी अर्धमात्रा॥ कालोद्धा अर्धमात्राकाल
व्यापकत्वात् अर्धमात्रा अथवा अर्द्धस्थाने जगतो ब्रह्मत्वनयामीयते ॥८॥

16



साक्षान्नियत इति अर्धमात्रेत्याहुः ॥ नृसिंहपूर्वतापनीभाष्यव्याख्यातार
स्तु चतुर्थीति तुर्यमात्रावाक्यस्थ अर्धमात्राशब्देनैव मात्रास्वरूपानिर्देशो द्रष्टव्यः ॥
लस्य लक्षणान्वितया प्रसिद्धत्वाद्विशेषनिर्देशाह्रस्वमात्राशब्दस्य वाक्ये गलस्यैव
हाप्यनुवृत्तेः ॥ यावसाने स्यञ्चेतुर्थ्यर्धमात्रा अर्द्धपरिमाणा मात्रा अर्द्धमात्रे
ति अर्द्धपरिमाणश्च नादः प्रसिद्धः स तु षण्मात्रः प्रणवः कीर्त्यते बुधैः ॥ पूर्वः
स्वरः परो नादः सप्तमात्राः प्रकीर्तिता इत्यभिधानात् ॥ पूर्वःऽ अकारो उकारो म
कओंकारः ॥ परो नादस्तदनंतरं मकारव्यंजनपूर्वकमाविर्भवन्नादः ॥ मीय
ते परिच्छिद्यते स्वविशेष्यमनयेति मात्रा परिमाणं ॥ अथवार्द्धशब्दोंशवचनः
अर्द्धांशभूता उक्ता मात्रा यस्य नादांशमात्रत्वादितरवर्णानां ॥ ह्रस्वांचिह्नं

॥१९॥ ख्यायांसाधारणनिर्देशो वाव्यंजनमर्द्धमात्रं मकारव्यंजनानंतरोद्भवो नादो प्यर्द्धमात्रः ॥ अत
एव प्रणवस्य सार्द्धमात्रात्रयमिति केषांचित्प्रवादः ॥ एवमर्द्धशब्देनैव चतुर्थमात्राया
नादात्मकस्वरूपनिर्देश इति भाष्यकाराभिप्रायः ॥ अत एव स्वनिर्देशा अर्द्धमात्रा नादा
त्मक इति ॥ तथा च चतुर्थी तुर्यपादं मन्यते ऽर्धमात्रा नादात्मक इति वदंति ॥ स चार्द्ध
मात्रावाच्यः शिव इति बिंबादिसोदाहृतस्मृतिवचनानुसारेणापि वदंति तदिदं वच
ने ॥ यथाहुः प्रणवाधारं नादं तद्वृषभध्वजं ॥ तच्छाखान्ते निविष्टं तु तत्त्वत्रये शिवमि
ति ॥ शाखानामतउपनिषद्भागस्तत्र निविष्टं तत्प्रतिपाद्यमित्यर्थः ॥ तथा वायवीय
संहितायां ॥ अर्द्धमात्रात्मको नादः ज्योतिर्लिंगस्य मूर्द्धनीति ॥ आचार्यैश्च पूर्वतापनीय
भाष्ये अर्द्धमात्रा नाद इत्युक्तं ॥ तथा विघेश्वरसंहितायामपि ॥ अर्द्धमात्रा महेशानि बिं ॥१९॥

18



दुनादस्वरूपिणीति बिंदुनादोमयात्मकत्वमर्धमात्राया उक्तं॥ यद्यप्येकमक्षरमोंकारः संहितावा
लेसत्याप्यसंहितावालेऽवांतरविभागः॥ क्वचिदकारोकारमकारात्मना त्रेधा विभागः क्व
चिदर्द्धमात्रया सह चतुर्द्धा विभागः॥ क्वचिद्बिंदुनादात्मना पंचधा विभागः॥ क्वचिच्छक्ति
शांतात्मना सप्तधा विभागः॥ तत्र बिंदुर्नाम पंचदशस्वरात्मकोऽनुस्वारः नादस्तु तद
भिव्यंजको ध्वनिस्तदुभयमर्धमात्रेत्युच्यते ध्वनेरनुच्चार्यत्वादर्धमात्राऽनुच्चार्येत्यु
च्यते अर्द्धमात्रास्थिता नित्या यानुच्चार्या विशेषत इति मार्कंडेये॥ तत्स्थाने यावसाने च
तुर्यार्द्धमात्रा सा सोमलोकं ॐकारशब्दो निर्दिश्यते॥ शक्तिर्नाम ध्वनेनैप्लुतावस्थाप्लुतेर्विरा
मावस्थाप्लोनादः शांत इत्युक्ते ॐकार इति॥ अथमेतच्छक्तिशांतावस्थाविशेषौ नादैक
देशापरपर्यायकलाशब्देनापि निर्दिश्यते॥ अयं चार्थः उत्तरगीताश्लोकव्याख्याने
तद्व्याख्यात्रा निरूपितः॥ अमात्रः शब्दरहितः स्वरव्यंजनवर्जितः॥ बिंदुनादकलाती

॥१०॥ तं यस्तं वेद स वेदविदिति अमात्रंक्कस्वरीर्विंदुनरहितं शब्दरहितं शब्दातीतं स्वरव्यंज
नवर्जितं अक्षरसन्महात्मकं यशानमिथेयम् ॥ विंदुनादकलातीतं अनुस्वारो बिं
दुः संतलेगलविवरेयत्कंठान्निःक्रमदस्वरदनुस्वारं लाति स नादः कलानादैकदेशस्तैरती
तं यथा कथंचिदुच्चारवाच्यमित्यर्थः ॥ एतादृशं ब्रह्म सम्यग्वेद स वेदविसकलवेदांतता
त्पर्यज्ञो नान्य इत्यर्थः ॥ सओंकार प्रकाक्लिलमित्यादिवचनाच्छब्दकृतयोरपि प्रणव
शब्दार्थान्तर्गतत्वं वाच्यं ॥ प्रणवेनाकारोकारमकारविंदुनादाः पंच प्रतीयंते ॥ नेतो
न्येवर्णत्रतः परिशेषादेतेषां मकारादीनां पंचानामन्यतमावस्थारूपत्वमेव वाच्यं ॥
चरमत्वेन श्रुतयोस्तयोस्तयोः प्रथमद्वितीयादिरूपाकारोकारमकारादिमात्रावस्था
तानुपपत्तेः परिशेषां नादावस्थाविशेषत्वमेव वाच्यं ॥ तदवस्थाविशेषत्वं तु प्रा ॥१०॥

गुत्कप्लुतत्वद्विमात्रावस्थारूपत्वेन तस्य माधुरीमाधोपपादनीयं ॥ तथा प्राणिशारत्वे ॥ अ
थशब्दोत्पत्तिः वायुशरीरसमीरणात्कंठोरसोः संधानेन तस्य प्राणिश्चकानि भवंति उ
रः कंठः शिरो मुखं नासिके इति ॥ संहते कंठे नादः क्रियते विवृते श्वासः मध्ये हकार
स्तावर्णप्रकृतयः नादोनुप्रदानं स्वरघोषवत्त्वविवृति ॥ नादस्वरूपमस्य बुक्करीयेव नि
रूपितं तस्येदं नाध्यं उक्तो वर्णसमाम्नायस्तेषां वर्णानां च दृक्कारणं कथं तदुत्पत्ति
रिति आकांक्षानेतरं तन्निरूप्यत इति आनेतयार्थोऽथशब्दः अथनाइतदुत्तरं ॥
यद्रूस्यतिलच्छब्दोत्पत्तिरित्यधिकृतं वेदितव्यमित्यधिकारार्थः ॥ शब्दो नाम ध्व
निः वर्णानामकारादीनामुपादानकारणं तदुत्पत्तिर्जन्म उपलब्धिर्वा ॥ यथोद्द
ष्टस्यपूर्वं श्रमोजतस्यैव तत्त्वं न नादइत्यतेतद्धत्त्येयमुच्यतइति प्रथमसूत्रार्थः ॥

21

॥११॥

वायुमग्निः समीर इति वायुशरीरं तथाभूतात्समीरणात्प्रेरणादभिघातादित्यर्थः कंठोरसोः संधाने मध्ये देशे शब्दोत्पत्तिर्भवति शिक्षान्तैवमस्ति ॥ मनः कायाग्निमाहंति सप्रेरयति मारुतं ॥ मारुतस्तूरसि चरन्मंद्रं जनयति स्वरमिति ॥ वायुश्च शरीरं च वायुशरीरे तयोः समीरणं तस्माच्छब्दोत्पत्तिरिति ॥ अन्ये त्वाहुरत्रेत्थं समासः ॥ राजदंतादित्वाच्छरीरस्य परनिपातः शरीरे वायुः वायुशरीरं तस्य समीरणं तस्मात् अस्मिन्मते वायोः समीरणकर्तृत्वमेव ॥ न तु कर्मत्वं ॥ इति द्वितीयसूत्रार्थः ॥ तस्य प्रकृतस्य शब्दस्यतुरः प्रभृतीनि स्थानानि प्रातिशाख्यानि भवंति प्रतिशाखं प्रतिध्वनिस्तत्संबंधीनि प्रातिशाख्यानीति तृतीयसूत्रार्थः ॥ संवृते कंठे नादः क्रियत इत्येतदादिसूत्रत्रयेण शब्दस्य त्रैविध्यमुच्यते ॥११॥

नादश्वासोहकारश्चेति तत्र प्रथमं तावंनादलक्षणमाह संवृते कंठे यः शब्दः क्रि-
यते स नादसंज्ञो भवति॥ विवृते कंठे यः शब्दः क्रियते स श्वाससंज्ञो भवति॥ सं-
वृतविवृतयोर्मध्ये मध्ये प्रकारे यः शब्दः क्रियते स हकारसंज्ञो भवति इति सू-
त्रत्रयस्याप्यर्थः॥ वर्णानां प्रकृतयो वर्णप्रकृतयस्ता वर्णप्रकृतयो भवंति॥ ये
नादश्वासहकारा उक्ता नादप्रकृतयः केचिद्वर्णाः श्वासप्रकृतयः अन्ये हकार
प्रकृतयः॥ अन्ये यथा मृत्प्रकृतयो घटशरावादयः यथा तंतुप्रकृतयः पटा
इति सप्तमसूत्रार्थः॥ स्वरेषु घोषवत्स्वच वर्णेषु च नादोऽनुप्रदानं भवति॥
अनुप्रदीयतेऽनेन वर्ण इत्यनुप्रदानं स्वकारणं अनुप्रदीयते उपादीय
ते जन्यत इत्यर्थः॥ ननु वर्णानां नादप्रकृतिकत्वे शुद्धविद्यातत्वप्रकृति
॥ इति अष्टमसूत्रार्थः॥

१२ कृत्वबोधकृवायव्यसंहितावच्चनविरोधाल्लेखेलुन॥ शास्त्रदृष्ट्यानुसारेणवर्णा
नांभिलितोनयप्रकृतिकृत्वोपपत्तेरविरोधात्॥ प्रणवांतर्गतौच्चबिंदुनादा
वनुस्वारतरंभिव्यंजकत्वोपाग्निपेरितवायुपाशिणामात्मकनादरूपोद्भावितत्वा
न्नासोनादाख्योबिंदुरित्यत्रबिंदुनादशब्दौलत्वप्रकृतिभूतौप्रणवांतर्गतबिंदु
नादशब्दाभ्यांभिन्नार्थकौबिन्दुनादशब्दौचनानार्थकौ॥ अयमेवचप्रण
वांतर्गतोनादःपरमेश्वरवाचकः॥ हंसोपनिषद्यपिनादशब्देननिर्दिश्यते॥
अयमेवचनादःशांतमत्कवोलप्रोलमित्यत्रश्रूलावनवस्थांतरविशिष्टोनिर्दि
श्यते॥ एषासोपरमोहंसोभानुकोटिप्रतीकाशोयेनेदंव्याप्तंतस्याष्टधावृत्ति १२
र्भवति॥ पूर्वदलेपुण्येमतिः॥ आग्नेयेनिद्रालस्यादयोभवंति॥ याम्येक्रौ

24

र्ये मतिः ॥ नैर्ऋते पापे मनीषा ॥ वारुण्यां क्रीडा ॥ वायव्ये गमनादौ बुद्धिः ॥ सौम्ये रति
प्रीतिः ॥ ईशान्ये द्रव्यादानं ॥ मध्ये वैराग्यं ॥ केसरे जाग्रदवस्था ॥ कर्णिकायां स्वप्नं ॥ लिंगे
सुषुप्तिः ॥ पद्मत्यागे तुरीयं ॥ यदा हंसो नादे विलीनो भवति तत्तुरीयातीतमिति ॥ अत्र
नादो हृदयाब्जकोशस्योपरि तिष्ठन् अनाहतनादो विवक्षितः यो बहिरपि श्रूव लिं
गस्योपरि तिष्ठन् प्रसिद्धमालयोर्विशिष्टवचीयसंहितायां महालिंगप्रादुर्भावे स
माम्नायते ॥ तत्राकारस्ततो भागे ज्वालालिंगस्य दक्षिणे ॥ उकारश्चोत्तरे भागे
मकारस्तस्य मध्यतः ॥ अर्द्धमात्रात्मना नादः श्रूयते लिंगमूर्द्धनीति ॥ तन्मू
लाधाराद्दुच्चनादोऽत्र विवक्षितः ॥ कर्णिकां विहायोपरि लिंगेन संबंध्य लिं
गं च तस्योपरि गच्छतो मूलाधारसंबंधाप्रसक्तेः ॥ एवं लिंगमूर्ध्नि स्थितस्या

१२ वा हलकारस्य एवं लिस्टभिरेवैतन्मात्राभिरखिलं त्रिधा॥ अभिधाय द्वितात्मानं
वोधयत्यर्द्धमात्रयेति शास्त्रोक्तेः तदीयरहस्यार्थानुचिंतनसहितं यत्परिशील
नं तदेव नादानुसंधानमात्रक्षते योगिनः॥ अयमेव नादः चिदादिप्रथम इति
वाक्ये ह्रामोमेघनाद इति अनेनोच्यते॥ एवं नादस्य वर्णप्रकृतित्वे स्थिते नादप्र
कृतिकस्याकारस्य निखिलवर्णप्रकृतित्वादुपपन्ने व्यंजनेष्वकारस्यानुगतत्वेपि
स्वरेष्वनुस्यूयमानेन निखिलवर्णानुस्यूयमानाच्च अकारो वै सर्वा वाक् इत्यत्र
अकारशब्देन तत्प्रकृतिभूतनादो लक्षणीयः॥ एवमोंकारेण सर्वा वाक् संतृण्या
त्यत्रोंकारशब्दस्तुरीयप्रणवात्मकनादपर इति॥ अन्यथा एवमोंकारेण सर्वा
वाक् संतृण्णेति वाक्यावगतसर्ववर्णान्वयत्वानुपपत्तेः प्रणवांतर्गताकारो १२

26

कार मकारादिवर्णापरत्वेनैव नादस्य प्रणवादिशब्दार्थत्वं न तु वर्णांतरोपर
त्वेन तस्मिन्प्रणवादिशब्दाप्रयोगात् ॥ अकारादिवर्णापरत्वनादत्वेनैवेश्वरे
शक्तिर्न तु वर्णान्तरोपरत्वेनेति ॥ अथवा नादमात्रस्यैव प्रणवत्वं ॥ न च गौरि
त्यादिशब्दानुगतनादस्यापि प्रणवत्वं स्यादिति वाच्यं ॥ नादत्वाकारेण प्रणवत्व
स्येष्टत्वात् ॥ गकारौकारविसर्जनीयानां तु न प्रणवत्वं ॥ तेषु तत्सत्वे प्रमाणाभा
वात् ॥ अकारोकारमकारानुस्वाराणां चास्ति प्रणवत्वे मानं तथाच श्रुतिः ॥ अ
कार उकार मकार इत्यादि सप्तप्रणवबोधितं ॥ पंचप्रणवबोधितमित्यादिस्मृति
श्च ॥ अकारोकारादिषु प्रणवत्वं द्वित्वादिवव्यासज्यवृत्ति प्रत्येकं मकारादिषु प्रण
वशब्दाप्रयोगात् ॥ समुदाय एव तत्प्रयोगात् ॥ नादे तु प्रणवत्वं गोत्वादिवत्परि
समाप्यवृत्ति केवलनादेपि यावसानेस्य च तुर्य्यर्द्धमात्रा सा सोमलोके ॐकारः ॥

27

१४ तुरीयो ह्ययमोंकारः ॐ तो ह्ययमोंकारः ॥ तुरीयोंकाराग्रविद्योतमित्यादिप्रयोग
दर्शनात् ॥ अतो नादस्य प्रणवत्वेनोक्तावित्यत्रायं च प्रणवो योगरूढस्तत्रोंकारो
कारमकाराद्यवयवशक्त्या ब्रह्मविष्ण्वादीनां विराडादीनां वाचकत्वात् ॥ यौगिकः स
मुदायशक्त्या तु परमेश्वरस्य वाचकः ॥ एवं तिसृभिरेव तन्मात्राभिरखिलं त्रिधा ॥
अभिधायशक्त्या वा तानं बोधयत्यर्द्धमात्रयेति स्वेच्छात् ॥ समस्तव्यस्ततोंकारणाद
गणस्यो भिलिपरभिति महिम्नि श्रवणात् ॥ अदृष्टविग्रहो देवो भावग्राह्यो मनो
मयः ॥ प्रणवो वाचकस्तस्य तेनाकुलः प्रसीदतीति स्मृतेः ॥ ब्रह्मविष्ण्वाद्यात्मकं वि
श्वविराडाद्यात्मकं परं ब्रह्मेति प्रणवाद्योगरूढिभ्यामन्वयबोधो भविष्यतीति त १४
सणयातु निर्विशेषचिन्मात्रप्रतिपत्तिरिति ॥ सूतसंहिताव्याख्यानरीत्यापि
२ प्रसंग इति ॥ तथा च नैव नादस्य परमेश्वरवाचित्वेनन्त्र कामो ह्यपरस्त्र २

वर्णोत्पत्तिप्रकारो निरूप्यते ॥ नादस्वरूपं निरूपसेग प्रयोगिजया स्थूलादिरूपत्रयं मात
का वर्णानां चैवमेव गंतव्य ॥ नियतकालपरिपाकानां हि प्राणिकर्मणां परिपक्वाना
मुपभोगेन प्रदायादितरेषां वा परिपक्वानां भोगाभावेन तद्ध्योयाः स्वेच्छरनुपयोगा
त् ॥ आकुलप्रत्यये प्रस्तसमस्तप्रपंचमायास्वप्रतिष्ठे निष्कले परमशिवे विलीना
पावदवह्निष्टकर्मे परिपाकं वृत्ते ॥ उक्तं हि प्रलये व्याप्यते तस्याचराचरमिदं ज
गद्दिति ॥ तथा ॥ जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ॥ तेजस्यापः प्रलीयंते
तेजो वायौ प्रलीयते ॥ वायुः प्रलीयते व्योम्नि तदव्यक्ते प्रलीयते ॥ अव्यक्तं पुरुषे ब्रह्मन् निष्कले सं
प्रलीयते ॥ इति ॥ अव्यक्तं माया तस्याश्च सम्यक्प्रलयो नाम सुप्ताविव नास्तीति को नाशः ॥ किंतु
स्फुत्तो सति मायागोचरस्ववृत्तीनामप्यभावात्स्वप्रतिष्ठपरमात्मप्रकाशस्यापि तन्निर्विकल्पतया

१५ तद्वलाज्ञासमानायाअपिअप्रतिभानप्रायत्वं नपुनरवभानमेवप्रतिभासमात्रशरीरस्य मिथ्या
वस्तुनोरवभानेसत्यभावएवस्यानुभूति॥ नचाभावएवास्तु॥ उत्तरसर्गानुपपत्तिप्रसंगात्॥ इतिवाच्यं
अवशिष्टैःप्राणिकर्मभिश्चतस्याम्मायायांविलियैवक्रमेणप्राप्तपरिपाकैः स्वफलप्रदानायपरमे
श्वरस्यसिसृक्षामायावृत्तिर्जन्यतेसैषामायावस्थाईक्षणकामतपश्चिकीर्षादिशब्दैरभिधीयते॥
तदैक्षतबहुस्यांप्रजायेयेतितैत्तिरीयके॥ तपसाचीयतेब्रह्मेतिमुण्डके विचिकीर्षुर्घनीभूतः क्वचि
दप्येतिबिंदुतामितिप्रपंचसारे॥ अपक्वकर्मभेदाद्घनीभावस्तदर्थव्यापारश्चिकीर्षापरिपक्वकर्माभि
रूपरिणतमायाविशिष्टबिंदुस्तदितरमविभागावस्थमव्यक्तमुच्यते अतएवतस्योपनिस्मर्य
ते॥ तस्मादव्यक्तमुत्पन्नंत्रिगुणंद्विजसत्तमेति॥ सएवजगदंकुराकारोव्याप्तश्चाधारात्मना १५
भ्यभिव्यज्यमानाकुंडल्यादिशब्दैरुच्यते॥ यथाहुःशक्तिःकुंडलीनीतिविश्वजननव्यापारबंधा

30



यमांशात्वेरुच्चनपुनर्विंशतिजननीगर्भेर्जकलं नराइति॥ कुंडलिनी सर्वदाशेया स्कुत्पुस्ता
भुगलेवसेलित्रवबिंदोः शालक्त्मेऽशाचिरचिरं शाविभागात्रैविध्यंततैवोक्तं॥ कालेनभिद्य
मानस्त्वस्माबिंदुर्भवतित्रिधा॥ स्थूलसूक्ष्मपरत्वेनतस्यत्रैविध्यमिष्यते॥ साबिंदुनादबीज
त्वभेदेनचनिगद्यतइति॥ अग्निरिंद्रस्थूलोबीजंविनिर्भिन्नः सूक्ष्मोनादः॥ सएवपुरुषश्चिदं
शात्परोबिंदुः सएवेश्वरः॥ तस्यत्रिधाविभागसमयेशब्दब्रह्मापरनामधेयस्यरवस्यात्पत्ति
रुक्ता॥ बिंदोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोभवत्॥ सरवः श्रुतिसंपन्नैः शब्दब्रह्मेतिगी
यतइति॥ सएवशब्दब्रह्मात्मकोरवोजगदुपादानंबिंदुतादात्म्येनसर्वगतोपिप्राणिनांमू
लाधारेभिव्यज्यतइत्युक्तं॥ सतुसर्वत्रसंस्थूलोजातेन्नतावद्वारोपुनराविर्भवतिदेहेषुप्राणि
नामर्थविस्तृतइतिदेहेष्वितिमूलाधारप्रदेशेतस्यानुस्थूलस्यरवस्यसंततपवनवलेना

१६

भिव्यक्तिराविर्भवनस्तत्रहि पवनस्योत्पत्तिकारःस्याद्देहेपि मूलाधारेस्मिन्समुद्यति समीरण इति
शालमर्थं विवक्षोः पुरुषस्येच्छयाज्ञातेन प्रयत्नेन जातो मूलाधारः पवनः संकृतस्तेन पव
नेन सर्वत्रस्थितं शब्दब्रह्मतत्त्वाभिव्यज्यते। तदभिव्यक्तं शब्दब्रह्म कारणं बिंद्वात्मकं प्रति
ष्ठा॥ तयानिष्पंदं सत्परावागित्युच्यते॥ तदेव नाभिपर्यंतमागच्छता तेन वायुनाभिव्यक्तं
विमर्शरूपेण मनसा युक्तं सामान्यस्पंदप्रकाशरूपपार्थबिंदुतत्त्वात्मिकाधिदैवमीश्वरस्व
पा पश्यंति वागित्युच्यते॥ तदेव शब्दब्रह्म तेनैव वायुना हृदयपर्यंतमभिव्यज्यमानं निश्च
यात्मिकया बुध्या युक्तं विशेषस्पंदरूपनादबिंदुमय्यधिदैवतं हिरण्यगर्भरूपा मध्यमा
वागित्युच्यते॥ तदेवास्यपर्यंतं तेनैव वायुना कंठादिस्थानेष्वभिव्यज्यमानं अकारादिक्षका
रांतवर्णमालारूपं परश्रोत्रग्रहणयोग्यं बीजात्मकमधिदैवतं विराड्रूपं वैखरी वागित्यु १६

ध्यते॥ तदुक्तमाचार्यैः मूलाधारात्प्रथममुदितो यस्तु भावः पराख्यः पश्चात्पश्यंत्यथ हृ
दयगो बुद्धियुङ्मध्यमाख्यः॥ वक्त्रे वैखर्यथ रुरुदिषोरस्य जंतोः सुषुम्नाबद्धस्तस्माद्भ
वति पवनप्रेरितो वर्णसंज्ञ इति॥ तत्र वैखरी स्थूलमातृका सा प्रथमाधिकारिणः पूजोप
करणं॥ मध्यमा सूक्ष्मा मातृका मध्यमाधिकारिणः पूजोपकरणं॥ कारणकार्यविंद्वालि
कापरापश्यंतीरूपा सूक्ष्मतरा मातृकोत्तमाधिकारिणः पूजोपकरणं॥ मातृकात्रैविध्ये स
र्वे मंत्रोपलक्षणं॥ अत्र तत्र सर्वे मंत्रा उत्करीसा स्थूलसूक्ष्मसूक्ष्मतररूपाः प्रथममध्य
मोत्तमाधिकारविषया इत्यर्थः॥ बहुवक्तव्यश्चायमर्थः॥ किंचित्तु प्रसलोपयोगाद्विस्फुत
इत्यर्थः॥ तत्रैव प्रदेशांतरे॥ तत्र स्वरूपं द्विजाः शब्दः सूक्ष्मो मास्वरतामियात्॥ प्रकृष्टह्ल
ध्यमाह॥ तत्र स्थूह इति द्विविधं लक्षणाडां स्वरूपं स्थूलं सूक्ष्मं च तत्र स्थूलं परश्रोत्रग

१८

हणयोग्यं वैखरीरूपतामापन्नमकारादिक्षकारांतवर्णतत्समभिव्याहारपदवाक्यप्रं
चाद्यात्मकमनेकं॥ सूक्ष्मं तु मध्यमारूपपरित्यागेन वैखरीरूपप्राप्त्याभिमुख्यलक्ष
णमेकं नादात्मकं प्रणवरूपं प्रणवे[illegible]कं वा प्राप्तिव्यंग्योत्थः स्थूलनादात्मकस्य
स्य कलशाद्युपादानभूतो मूर्धन्यतिव्यज्यमानांतरः सूक्ष्ममक्षरं तस्य चाक्षररूपप्रा
प्त्याभिमुख्यस्य नादात्मकता शब्द इत्यनेनोक्ता॥ उक्तं हि सांबेन ॐमित्येतन्नेदं तिर्निर्मितं प
यः प्रतिप्राणिशब्दो वाणी यस्मात्प्रभवति परा शब्दतन्मात्रगर्भा इति॥ तथा चैवाग
मप्रकारेण नादस्वरूपं निरूप्यते॥ अस्मितावद्विवक्षापूर्वकः शब्दप्रयोगः विवक्षा
यत्तत्तदर्थविमर्शपूर्विका॥ स च विमर्शः शब्दानुवि[illegible]र्थाध्यवसायरूपः स्ववि

१८

34

षयार्थे आंतरेकेन विद्विषयीकृते सत्येव भवितुमर्हति ॥ बाह्यघटाद्यर्थे च स्फुटादिवा
विषयीकृत एव तद्व्यवसायदर्शनेन बोद्धा॰व्यवसायस्य स्वसमानविषयकज्ञानक
रणत्वं क्लृप्ते नियमावधारणात् ॥ अन्यथा सर्वदा सर्वार्थविमर्शप्रसंगात् ॥ यत्र
विमर्शविषयविषयको विमर्शकारणं स एव नादः स एव तत्तदर्थवाचकः अन्यस्य वा
चकत्वस्याभावात् ॥ वर्णानां प्रत्येकमवाचकत्वात् ॥ मिलितेषु वाचकताकल्पने व्यास
ज्यवृत्तिः शक्तिकल्पनागौरवं व्योत्तरटत्वादेः शक्ततावच्छेदकस्यानुगतस्याभावेन श
क्ततावच्छेदकभेदेनानंतशक्तिकल्पनागौरवापत्तेः ॥ नन्वश्रोत्रकरणकज्ञानविषय
वर्णानित्यत्वे विमर्श एव वाचकोस्त्विति वाच्यं श्रोत्रात्मनि विमर्शोत्पत्त्यर्थं नादस्या
वश्यकत्वेन तत एवार्थप्रत्ययोपपत्तौ मध्ये विमर्शकल्पनायां गौरवात् ॥ सानाभा

ष्य सच प्रतिपुरुषमवस्थाभेदेन च भिन्नः कार्यरूपः ॥ विद्यातत्व कुंडलिनी महामाया
दिशब्दशब्दितमिश्राख्योपादानभूतमायाभिन्नशुद्धाध्वप्रकृतिभूततत्तोपादेयत्वा
गमेषु प्रसिद्धः ॥ सच नत्तु गनस्य परामर्शहेतोर्नादस्य श्रोतर्यभावादर्थप्रत्ययोन
स्यादिति वाच्यं ॥ स्थूलशब्दैः प्रतिपत्तरि नादाभिव्यक्त्या तत्तदर्थप्रत्ययोपपत्तेरित्या
गमिकाः ॥ शुद्धविद्यातत्वं विद्येशानां च भोगदं भुवनम् ॥ अथ त्वन्युक्तं मन्त्रान्यैः सदा
गमैः श्रेयसे च हेतुरिति ॥ वागग्रब्रह्मणि निष्णातश्चिद्ब्रह्माप्नोति येन तत्तथयंति ॥ य
थाहुः ॥ शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छतीति ॥ सा च कुंडलिनी नादावस्थाप
न्ना वर्णप्रकृतिर्नादश्च स्वजन्यैरेव वर्णैर्व्यज्यते यथा वह्निजन्यधूमेन वह्निर्व्यज्यते
तद्रूपरमायानिरूपणोपयोगितेन षडङ्गशक्तलानि निरूप्यंते वायवीयसंहितायां स

त्तमाध्यायेजगत्सृष्टिप्रश्नेमायुरुवाचशक्तिःप्रथमसंभूताशांत्यतीतपदोत्तरा॥ततोमायाततोऽव्य
क्तं शिवाख्यमनःप्रभो॥शांत्यतीतपदंज्ञेतततःशांतिपदंक्रमात्॥ततोविद्यापदंतस्माप्रतिष्ठांपदसंभ
वः॥निवृत्तिपदमुत्पन्नंप्रतिष्ठापदतःपरं॥एवमुक्तासमासेनसृष्टिरीश्वरचोदिता॥अस्यार्थः शक्तिम
तः शिवात्सूक्ष्माचिदचिद्रूपापन्नचिच्छक्तिविशेषाच्छक्तिमायाव्यक्तशब्दवाच्यास्तिस्रःप्रकृतयः
क्रमेणप्रादुर्भूताः॥साचशक्तिःशिवतत्त्वपरबिंदुपरमायाशुद्धमायामहामायाकुटिलाकुंडलीत्यादि
शब्दालंबनत्वेनशुद्धाध्वगतसकलतनुभुवनभोगस्थानभोगोपकरणानामुपादानतयाचशिवश
क्त्रेपसिद्धा॥ततःशक्तिःसदाशिवोमहेश्वरःशुद्धविद्येतिचत्वारितत्वान्युत्पद्यंते॥ततोमायाततस्त
दनंतरंपरमायामिश्राध्वगतसकलतनुभुवनाद्युपादानभूताजायते॥ततःकालोनियतिःक
लाविद्यारागःपुरुषःइतिषट्तत्त्वानिजायंते॥ततोऽव्यक्तंतदनंतरमशुद्धाध्वगततनुभुवनाद्युपादान

२६ भूतमव्यक्तमायाविर्भवति ॥ ततो बिंदुरहंकारो मनः पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि चशब्दादीनि
तन्मात्राणि पंच वियदादीनि भूतानि त्रयोविंशति तत्त्वान्याविर्भवंति एतानि परशक्त्यादीनि पृथि-
व्यंतानि ३६ निषट्त्रिंशत्तत्त्वानि शिवशास्त्रे प्रसिद्धानि तत्र तत्र श्रुतिन्यायैर्व्यवस्थापितानि ॥ शा-
क्तिपदं शुद्धाध्वगतं तत्त्वानामुपलक्षणं ॥ एवं मायादिपृथिव्यंताश्चिच्छक्तेः श्वेताश्वतरोप-
निषदि देवात्मशक्तिं स्वगुणैर्निगूढामिति मंत्रे प्रसिद्धा ॥ देवात्मशक्तिमित्यस्य देवस्य शिवस्या-
त्मभूतां चिद्रूपां शक्तिमित्यर्थः ॥ चिच्छक्तिर्महामायायाः परमार्था व्यक्ताश्चेति चतुष्टयं ॥ परास्य
शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति मंत्रे प्रसिद्धं ॥ वायवीसंहितायामुत्त-
रपरिच्छेदे पंचमाध्याये ॥ सैका परा च चिद्रूपा शक्तिः प्रसवधर्मिणी ॥ विभज्य बहुधा विश्वं विदधा-
ति शिवेच्छया ॥ इति श्लोके श्रुतिगतपरापदं शक्तिपदं च व्याख्याय परस्याः शक्तेर्विभागं वक्त- १९

द्वैतैकरूप्याः कथं विभाग इत्याकांक्षायां मूलप्रकृतिशब्दवाच्यमहामायावच्छिन्नत्वेनापर
मायावच्छिन्नत्वेनाव्यक्तावच्छिन्नत्वे त्रैविध्यमपि प्रेक्ष्यतां मूलप्रकृतिर्माया त्रिगुणा त्रिवि
धा नवेतत्।। द्विधाद्यवनिपर्यंतं यथा ततमिदं जगत्।। एकधावच्छिन्ना चैव तथा शत
सहस्रधा।। शक्तयः खलु मिथ्यैते बहुधा व्यवहारत इति।। एवं निगतविविधत्वं प्रपं
चितम्।। तत्रैव श्रीविद्यायामितं ब्रह्मांडं पृथिवीतत्त्वं निवृत्तिकलायामवतिष्ठते।।
जलाद्यव्यक्तांतानि त्रयोविंशतितत्त्वानि प्रतिष्ठायां पुरुषादिमायांतानि विद्यायां शुद्ध
विद्यामहेश्वरश्च शांतौ सदाशिवशक्तिश्च शांत्यतीतायामित्थं कलानामाधारत्वं द्रष्ट
व्यं।। या महामाया कुंडल्यादिशब्दाख्यैकत्वेनोक्ता सा कारणत्वेन पंचापि कला व्याप्य
ततस्तु पर्यपि स्थिता शांत्यतीतपरोत्तरा भवतीति शांत्यतीतपरोत्तरेत्युक्तं।। ननु श्रुति



२.

हृर्णानां कुंडलिनीप्रभवत्वं श्रूयते क्वचिद्विद्याप्रभवत्वं क्वचिदाज्ञाप्रभवत्वं ॥ श्रूयते
क्वचिन्नादप्रभवत्वं क्वचिद्बिंदुप्रभवत्वमिति विरोध इति चेन्न ॥ कुंडलिनीनाम्न्याः शुद्ध
विद्यायाः विद्याललावस्थापन्नायाः वर्णप्रकृतित्वं विद्यालत्वस्यैव नामालेरनाद इति
मध्यमावस्थापरिणामेन प्राणवायुवशाद्ब्रह्मरंध्रपर्यंतं त्यास्यवस्था नादाख्य प्रडावा
वस्था सैव ब्रह्मरंध्रोज्जिहलावं क्रमाकाशपर्यंतावस्थापन्ना बिंदुरिति सकलसंहिताव्या
ख्यानपर्यायेऽोचनयाऽवगम्यते अनुस्वारादावपि बिंदुशब्दः प्रयुक्त इति नानार्थो बिं
दुशब्दः ॥ तथा च नादावस्थाविशेषबिंदुप्रभवस्यापि वर्णस्य नादप्रभवत्वं न विरुद्धं ॥
प्रातिशाख्यग्रंथे ध्वन्यात्मकः शब्दस्त्रिविधः नादः श्वासो हकारश्च ॥ नादः स्वरघो २०
षवत्सु कंठोपादाने ॥ अघोषेषु श्वासः ॥ हकारो हचतुर्थेष्विति निरूपितं ॥ नादावस्था

विशेषभूतं बिंदोरेवावस्था विशेषो नादः श्वासो हकार इति शब्दैरुच्यते ॥ अतो बिंदात्म
कनादप्रभवत्वं वर्णानामिदस्य नादस्य न प्रतिज्ञारब्धग्रंथविरोध इति ॥ आकाराद्या
स्त्रयो वर्णा अकारादिपंचवस्थतु ॥ ऋकाराद्याउकारान्तस्वराः श्लिष्टा मकार कात् ॥ व्यंज
नानि समस्तानि प्रकाश्यंते यथा पुरा ॥ सर्वं बिंदोर्विजायते वा बिंदुर्नादात्मकाद्युच्यते ॥ नादः
साक्षात्परं ज्योतिस्वरूपात्परमात्मनः ॥ विभासते ततः साक्षान्मातृकावर्णरूपिणीति
सोर संहितावचनाद्यद्यपि एवं प्रतीयते नादावस्थाविशेषभूतात् बिंदोरकारोकारमका
राजायंते ॥ अकाराख्ये आकारादयश्चत्वारः स्वरा उकाराख्ये तदन्ये स्वरा मकाराख्ये व्यं
जनानीति प्रतीयते ॥ नादश्वासहकाराणां वर्णप्रकृतित्वं प्रतिज्ञारब्धग्रंथे श्रूयते त
थापि कृत्यभेदेन व्यवस्थांगीकाराच्च विरोधः ॥ अथवा आदेचोरष्व्यादिसंज्ञा यथा

२१

तथा व्यवहारोपयोगित्वेन क्रियते ॥ तथा बिंदुवत्स्थापनप्रकारस्य प्रातिशाख्यग्रंथस्थत्वा
द्धेतुप्रदर्शनमित्यादि व्यवहारोपयोगित्वेन संज्ञो क्रियते ॥ एवं स्थिते सति बिंदुवत्स्थानाद
अकारोकारान स्थानं प्राप्य स्वराणां हेतुः ॥ अकारोकारो प्रतिस्वास्वान्मकाराख्ये व्यंजनाने
स्थानं प्राप्य घोषवत्सु मकारावस्थ एवं श्वाससंज्ञो ध्वनिः ॥ अघोषेषु मकारावस्थ एव हका
रसंज्ञः ध्वनिश्चतुर्थेषु प्रकृतिः नादो ध्वनिरिति पर्याय इति कृत्वा प्रातिशाख्यव्याख्या
नेन विरोधः ॥ ननु कुंडलिनीप्रभवो नादः एकः कोष्ठाग्निप्रभवो वायुजन्य अपरः अ
यते तयोः कस्य वर्णप्रकृतित्वमित्यपेक्ष्यते मलिनाध्यांतर्गतप्राणिनां वर्णोत्पत्तये विध
नादप्रकृतिकाः प्राणवायुविकारात्मकनादमात्रप्रकृतिकानां भविष्यंति शुद्धाध्वगता २१
नां तु प्राणिनां तनुभुवनकरणभोगोपकरणानां शुद्धमायामात्रप्रकृतित्वेन मलिना

ध्वांलगतिप्राणवायुप्रभवत्वानुपपत्तेः॥ कुंडलिनीप्रभवनादप्रभवत्वं वर्णानं स्फुटद्धा
ध्वगलप्राणिवर्णविषयमिति न विरोधः॥ यद्वा मूलाधारगतकुंडल्यवस्थाविशेष
मूलध्वनेर्मध्यमावस्थां प्राप्तस्य प्राणवायुभिव्यक्ततया तत्प्रभववर्णानां कुंडलिनी
प्रभवनादजन्यत्वप्राणवायुजन्यत्वव्यपदेशो न विरुद्ध इत्यस्मिन्पक्षे प्राणवायुप्रभ
वः कुंडलिनीप्रभवश्च नाद एक एवेन नादद्वैरइति॥ आकाशाश्च न वर्णात्मकशब्द
प्रकृतिः यथा वायुभिः स्फुटशब्दस्योपादानं तेजश्चे गुंगुगुग्गुशब्दस्य जलं बुंडुबुंडुशब्दे
स्य पृथिवी कूटकूटशब्दस्येति यथा तद्वदाकाशस्य प्रतिध्वन्यात्मकशब्दस्य प्रकृतित्वं
न वर्णप्रकृतित्वमित्यंगीकारेण विरोधाभावात्॥ नन्वेतद्रीत्या वर्णानां नादप्रकृति
त्वे अकारोकारमकाराणां परस्परप्रकृतिविकारभावाभावेन कथमकारादीनामुका

२२

रादिषु लयउक्तः श्रुतिश्चेति चेत् ॥ न तेषां प्रकृतिविकारभावाभावेपि तत्त्वातिपाद्यानां वि
राडादीनां प्रकृत्यंतानां प्रकृतिविकारभावेन वाच्यवाचकयोरभेदाध्यवसानेन प्रकृ
तिविकारभावोक्तिरिति सर्वं समंजसं ॥ नादाख्य प्रथमावस्थाहृच्चिव्यक्तस्य मध्यमा
वस्थापरित्यागेन प्रसरं प्रपर्यंतत्यागस्य पालावत्वं तरे व्याप्यनवस्था सा नादाख्या ॥
फलोपहितजनकलापत्वात् प्रसरं प्राप्तिहृतस्य नादस्य व[illegible]पर्यंतत्यागस्यावस्थाव
र्जिजनकलापफलोपहितत्वमत्वरूपावस्था बिंदुसंज्ञा ॥ तस्याः बिंदवस्थायाः स्थू
लाया स्तत्पूर्वा नादावस्था स्तत्सूक्ष्मा तेऽव्यावस्थे यथाक्रमं वैखरी मध्यमावस्था ह्रा
दे नोच्यते ॥ अतः सूक्ष्मा नाभ्यभिव्यक्ता पश्यंत्यवस्था ॥ ततोपि सूक्ष्मा मूलाधारा
भिव्यक्तावस्था परावस्था ऽलाऽवावस्थाः चेतारि वाक्परिमितापदानीति श्रुति २२

प्रदर्शिताः ॥ तत्र वैखर्यवस्थापन्नस्य नादाख्यप्रणवस्य विराडधिदैवतं मध्यमाख्यावस्थापन्नस्य हिरण्यगर्भोऽधिदैवतं पश्यंत्याख्यस्य मायाविच्छिन्नचैतन्यात्मा ईश्वरअधिदैवतं ॥ शुद्धमायावच्छिन्नचैतन्यमुमाख्याचिच्छक्तिः सैव पश्यंत्या अधिदैवतमिति शैवागमज्ञा वदन्ति निष्कलं परं ब्रह्म पराप्रणवार्थ इति शास्त्रस्थितिः ॥ एवं स्थिते सति नादशक्तिशांतशब्दैः सूक्ष्मत्वसूक्ष्मतरत्वसूक्ष्मतमत्वसाधर्म्येण मध्यमापश्यंतीपराप्रणव एव यथाक्रममुच्यत इति युक्तयाऽस्माकं प्रतिभाति अस्मिन्पक्षे अनुस्वाराख्यो बिंदुर्मकार एवांतर्भावनीयः ॥ नादस्थूलावस्था बिंदुमादायैव चतुरवस्था पंचवस्था सप्तावस्था प्रणवस्योपपादनीया इति ॥ अन्ये तु बिंद्ववस्था नाद एवांतर्भाव्य मकाराच्चानुस्वारं पृथक्कृत्यानुस्वाराख्यबिंदुमाश्राय प्रणवस्य चतुरवस्था

पंचावस्थांसप्तावस्थांप्रतिपादयंति॥ हुलावस्थोनादः शक्तिः॥ तद्धिरामावस्थः शांत
इति केचिद्विदुः कोऽनुदित इति सर्वोन्कार्थः संक्षेपतः स्मारितः॥ अस्मिंपक्षे प्राणवा
युप्रभवोनादः नकुंडलिनीप्रभेवनादशक्तिर्घतइति एवकइव नादः॥ तथाचैतल्लि
ङ्गुमप्रणवात्योनादः स्थूलसूक्ष्मसूक्ष्मतरतत्स्वलमवलरूपावस्थात्रेदैर्घ्य
थोऽयं बिंदुनादशक्तिशांतशब्दैर्वैखरीमध्यमापश्यंतीपराशब्दैरभिधीयत
इति॥ ननुवर्णात्मकशब्दगतत्वाच्छक्तेः रवर्णात्मकनादशक्त्यादीनामर्थवि
शेषोपस्थापकत्वं कथं स्यात् अशक्तत्वादिति चेत्॥ उच्यते नहि वर्णगतैव शक्तिरि
च तिनियमः किंतु शब्दगता॥ सवर्णात्मकोनादात्मकश्चेति तथाच नादतदवस्था
शक्तिशांतयोश्च॥ अर्थविशेषोपस्थापकत्वमविरुद्धम्॥ यदि वर्णगतैव शक्ति

रितिनियमस्तथाप्यनुस्वारत्वेन बिंदुशब्दवाच्यस्याक्षरस्य ह्रस्वनाशे परक्तत्वेन ना
दशब्दवाच्यत्वं तस्यैवाक्षरस्य प्लुत्यवस्थनाशे परक्तत्वेन शक्तिशब्दवाच्यत्वं प्लुतिवि
रामावस्थापन्ननाशे परक्तत्वेन शांतिशब्दवाच्यत्वमिति शक्तेर्वर्णगतत्वेपि नवि
शेषः॥ शक्तकलावच्छेदकभेदाश्च तत्तदर्थविशेषेषु शक्तिभेद उपपद्यते यथैक
स्यैव विधिप्रत्ययस्य लिङ्त्वादिना इष्टसाधनत्वे शक्तिराख्यातत्वेन कृतावेक
वचनत्वेनैकत्वसंख्यायीतद्वत्॥ केचित्त्वनुस्वारोनुस्वारत्वेन रूपेण बिंदुशब्द
वाच्योनुस्वार एव॥ शब्दत्वेन रूपेण नादशब्दवाच्यः स एव प्रकृतिपरिणामतया
प्रकाशात्मकत्वेन शक्तिशब्दवाच्यः स एव चिद्विवर्त्ततया चिदन्वितत्वेन रूपेण
शांतशब्दवाच्यः॥ शक्तकलावच्छेदकभेदेन शक्तिभेदादर्थविशेषोपस्थापकत्वं चेति

वदंति॥ अथवा नादत्वरूपशक्तावच्छेदकस्यैकत्वेपि सैंधवादिशब्दवदनेकार्थत
या सदाशिवो माशक्तिस्तदाश्रयैश्वरारूपानेकार्थकत्वमविरुद्धं॥ स एव नादउ
माख्यात्मकशक्तिवाचकतया शक्तिशब्देनोच्यते॥ स एव शांतशब्दवाच्यशान्त्या
अय परमेश्वरवाचकतया शांतशब्देनोच्यते॥ वाच्यवाचकयोरभेदेन वाच्यो
पस्थापकशब्देन वाचकस्यापि निर्देशस्य संबंधसेत्यादिप्रदर्शनात्॥ यद्वा तु शां
तशब्देन नादस्य हृत्यवस्थारूपशक्तिः शब्दार्थस्य विरामावस्थारूपस्रस्यो नादः
शांतशब्दार्थस्तदानीं शांते परमात्मनि संप्रतिष्ठाप्येतत्र नादांतशब्दः शांते प्रणव
पर॥ तथा च शांतशब्दवाच्यतया तद्रूपे परमात्मनि इत्यर्थः पर्यवस्यति॥ याव
सानेरस्य च तुर्थ्यर्द्धमात्रेस्य त्रार्द्धमात्रात्मकचतुर्थनादवाच्यतया तद्रूपत्वोक्तिः॥

ध्येयस्य शक्तिशांतावस्थयोर्नादेन्तर्भूतत्वेऽपि भिन्नविवक्षयेति मंतव्यं॥ नादस्यैव नाना
र्थकत्वेन परमकारणसोमनाचित्वं सदाशिववाचित्वादिति पक्षे नादान्तशब्देन नाद
रूपोऽकारादिमात्रापेक्षयांतश्चरमस्तद्वाच्यतया तद्रूपे परमात्मनीति व्याख्येया
श्रुतिः॥ न चैवं शांत्यतीतकलाधिष्ठातुः सदाशिवस्यैव ध्येयत्वमत्रोच्यते॥ ननु स
दाशिवादिब्रह्मतानां पंचानां त्रयाणां गुणानां वा नाराणां च मूलमूलस्य सोमस्ये
ति वाच्यं॥ नादान्ते परमात्मनि संप्रतिष्ठाप्य ध्यायीतेशानमित्यनेन ध्येयत्वेनोक्त
स्येशानस्य प्रणवस्य मात्रा पृथिव्यकार इत्यादिना अकारादिमात्रावाच्यत्वेन निर्दि
ष्टमात्रात्रयवाच्येभ्यो गुणावतारेभ्यः पृथक्त्वेन ध्येयस्य तुर्यस्य निर्देशात्॥ ब्रह्म
विष्णुरुद्रेशास्ते संप्रसूयंत इत्यनेन सदाशिवादिपंचब्रह्मोत्पत्तिकारणत्वमेव

२५ णाञ्च सदाशिवादिप्रख्यातानां पञ्चानां त्रयाणां गुणानाञ्च ताराणाञ्च मूलभूतः सोम ए-
व परमकारणभूतः प्रणवेन ध्येय इत्यनुगम्यते ॥ अत्रेदं पदं महेश्वरसदाशिव-
योरुभयोरुपस्थापकमिति । वायवीयसंहितायां लिंगाध्याये व्याख्यातं ॥ किंच
ब्रह्मविष्णुरुद्रादेर्मूर्त्ताभिमानिनः सत्त्वादिगुणाभिमानिनः निवृत्तिप्रतिष्ठा
विद्याकलाभिमानिनश्च गृह्यंते ॥ संकोचे कारणाभावात् ॥ यज्ञेन दानेनेत्यत्र
यज्ञशब्देनासंकोचेन नित्यकाम्ययज्ञग्रहणवत् ॥ यद्यपि सदाशिवमूर्त्तिवि-
शिष्टस्यापि परमेश्वरस्य विष्णवादिमूर्त्तिविशिष्टत्वेनेव प्रणवध्येयत्वं विद्येश्व-
रसंहितादौ श्रूयते तथाप्यस्यां श्रुतौ तन्मूलभूतः सोमो ध्येयत्वेनावगम्यते
इति ॥ ननु के सदाशिवादयो प्रख्याता येषां मूलभूतेशानो ध्येय इष्यते ॥ अथ
२८

नामध्वपतेश्रेष्टस्याध्वनः पारमद्रीय॥ अध्वानमध्वपतिमध्वविरोधदंनीतितल
स्मै नमः सकललोकविलक्षणायेत्यादिश्रुतिस्मृतिष्वां षडध्वानः प्रसिद्धाः॥ अ
स्य मंत्रस्यायमर्थः॥ अध्वपते॥ अध्वनां षण्णां तत्र प्रथमंत्रिकं नाम मप्रपंचात्म
कं द्वितीयत्रिकं रूपप्रपंचात्मकं॥ तथाच नामरूपप्रपंचात्मकषडध्वनां पते इत्य
र्थः॥ तथा वायवीयसंहितायां॥ सर्वोपरिकृतावासः सर्वाशास्वन्वशाश्वतः॥
षड्विधाध्वमयस्यास्य सर्वस्य जगतः पतिरिति॥ एते षडध्वानो मलिनमिश्रशु
द्धाध्वस्कंत्रिधंतर्गताः॥ एतेषां त्रयाणामध्वनां मध्येश्रेष्टस्याध्वनः शुद्धाध्वनः
पारं परपारं तत्र अध्वातीतं परं पदं सासोमलोकः ॐकारः॥ तदूर्ध्वमुन्मनीलो
कः सोमलोकमलोकिकं॥ सोमः सहोमयायत्र नित्यं वसति शाश्वत इत्यादिश्रु

२६

तिस्मरतिप्रसिद्धंगमत्रविष्णुरुद्रेंद्रप्रवर्तकस्यजगतःस्रष्टुःसांवस्यनादवाच्यस्यप्रण
वध्येयस्यावासम्भूलेसोमलोकमहीयप्राप्तवानीत्यर्थः॥उपासकस्यार्चिरादिमा
र्गेलापरंपरंप्रलिंगछलस्तरवर्णिन्नतानामेलेषांमार्गत्वादेषध्वशब्दप्रयोगइ
ति॥अथवाशब्दस्यशब्दादयोविषयाःजीवसंघालापञ्चषडध्वद्वाराजीवस्यभोग
प्रापकाइतिजीवस्यशब्दादिविषयप्रयुक्तभोगप्रापकौमार्गत्वात्॥येषुअध्वश
ब्दप्रयोगः॥तेचवर्णपदमंत्रकलातत्त्वभुवनाख्याः॥भुवनाध्वातत्त्वाध्वनाव्या
प्तः तत्त्वाध्वाचकलाध्वनाव्याप्तः कलाध्वाचपंचविधः शांतिकलाशांत्यतीतक
लाप्रतिष्ठाकलाविद्याकलानिवृत्तिकलाचेतिषड्त्रिंशत्तत्त्वानिपंचसमुदाया २६
त्वाविभक्तानितेषुप्रत्येकमुपष्टंभकभावेनव्यापकानिद्व्याप्तिशांत्यती

52

तादिकलाशब्दवाच्यास्तेषामधिष्ठातारः सदाशिवादिब्रह्मान्ताः पंचदेवास्ते
चपरब्रह्मणः शिवस्य शरीरभूता मूर्त्यात्मान इति व्यपदिश्यंते ॥ तदन्तर्गतब्रह्म
विष्णुरुद्रावस्थाविशेषभूता ब्रह्मादयो गुणावताराः पंचभूताभिमानिनश्चै
तेषां शान्त्याधिष्ठास्तत्तुल्यनामानस्तत्तुल्यविग्रहा व्याप्तिकारि क्षेत्रज्ञविशेषाः
कलाधिष्ठातारो गुणावताराश्च परब्रह्मावस्थाविशेषभूता ब्रह्मकोटिनिविष्टा
स्तेषु पूजितेषु तत्कृपापन्नः परमेश्वरः पूजितस्तेषु प्रणवादिपवित्रैर्मंत्रैरुपासि
तेषु परमेश्वर एवोपासितः सर्व एते ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयंत इति वाक्ये
ननिर्दिश्यंते तेषां मूलभूतः सांबो ध्यायीतेशानमिति वाक्ये ईशानशब्देनोच्यते ॥
स्तत्संहितायां तु पंचभूतानां सूक्ष्मावस्थाः कलाशब्दवाच्या इत्युक्तं ॥ केचि

53

२८ त्तु कलासर्गकरं देवं ये विदुस्ते जहुस्तेनुमिति श्रुत्या निरुक्त्यायाः कलाः प्रतिपाद्यं
ते तदधिष्ठातारश्च सदाशिवाद्या यथा ब्रह्मविष्णुरुद्रेशाः संप्रसूयंत इति वाक्ये
न निर्दिश्यंते ॥ तथा पंचपादं पितरं द्वादशाकृतिमिति वाक्येन निर्दिश्यंते तस्या
यमर्थः पंचसदाशिवादिब्रह्मांता ईशानाद्याः संघाताश्च पादा अंशा यस्य तं पं
चपादं तान्प्रति पितरं सूर्यांतर्यामिणं परमेश्वरमिति ॥ तथा पंचारं चक्रं परिव
र्त्तते पृथुहिरण्यज्योतिः शरिरस्य मध्य इति वाक्यमपि उक्तार्थे प्रमाणं ॥ शैवे
कैलाससंहितायां चेदं वाक्यमेवं व्याख्यातं ॥ सदाशिवादिब्रह्मांतानि नादबिंदु
दि पंचप्रणववाच्यान्यनुग्रहादिपंचकृत्यकारीणि प्रणवोयास्यानीति निर्दिष्टं २८
तदुत्तरं च पच्यते इदं खलु जगच्चक्रं क्रति विक्रति वेचनवं ॥ पंचारं चक्रमितिहि

स्तौति श्रुतिरिदं मुने ॥ एकमेव जगच्चक्रं द्वयोः शक्तिविजृंभितं ॥ सृष्ट्यादि पंचा
वयवं पंचारमिति कथ्यते ॥ अनालच्चक्रमिवदविछिन्नलयोदयं ॥ इदं खलु
जगच्चक्रं श्रुतिविश्रुतवैजवं ॥ परितो वर्त्तते यस्मात्तस्माच्चक्रमितीरितमि
ति ॥ अस्यायमर्थः इदं सदाशिवादि ब्रह्मांते जगदात्मकं चक्रमिति पंचारं ॥ सदा
शिवादि ब्रह्मांत पंचावयवकमित्यर्थः ॥ तथा मनुस्मृतौ प्रशासितारं सर्वेषाम
णीयांसमणोरपि ॥ रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परं ॥ एष सर्वाणि भूता
नि पंचभिर्व्याप्य मूर्त्तिभिः ॥ जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवदिति ॥ पंच
भिर्व्याप्य मूर्त्तिभिरित्यस्यायमर्थः ॥ पंचभिः सदाशिवादि ब्रह्मांतैरीशादिस
द्यांतैश्चेति ॥ अत एव च श्रुतिः स वा एष पुरुषः पंचधा पंचात्मेति ॥ वायवीयसंहिता

55



२८

यं मूर्त्तयस्तस्य विख्याताः पंचब्रह्माह्वयाः पराः ॥ पंचब्रह्माणः सदाशिवाद्या ईशा
नान्ताश्चेति एतेषां सर्वेषां मूलकारणं सांबमूर्त्तिधरं परं ब्रह्म ब्रह्मविष्णुरुद्रेन्द्राः सं
प्रसूयन्ते इत्यनेनोच्यते इति ॥ यद्यपि ईशानस्यैव ध्येयत्वं श्रूयते ध्यायीतेशानमि
ति न तन्मायास्तथाप्युत्तरवाक्योपक्रमेऽर्द्धमात्रासंबंधिदेवतात्वेन निर्दिष्टस्य संवर्त्त
काग्नेः सा सोमलोक ॐकार इति सोमपदसन्निधानेन सोमरूपत्वावगमात् ॥ म
घवारिणोत्यादिवत्तमलुप्तसमानार्थकवचिवन्तेन पर ईशान्चेत्यनेन ईशानास्यास्ती
ति ईशाना इत्येवमर्थकेन ध्येयस्य शिवस्य उमासाहित्यावगमात्तैत्तिरीयके पत्न्या
दिश्चतिप्रपत्तं हङोघुन्च ध्येयस्य तुर्यस्योमासाहित्यावगमात्सांब एव परमेश्व
रः प्रणवध्येय इत्यवगम्यते ॥ प्रणवस्यासंहिताकाले एते विभागा उक्ताः ॥ संहि २८

तत्काले एको वर्णः एकं पदं तस्याखंडस्य परमेश्वरे शक्तिः तस्य वाचकः प्रणव इति स्म
त्रात्।। अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः।। प्रणवो वाचकस्तस्य तेनाहूतः प्रसी
दतीति स्मरणाच्च।। तथा चिंतनीयजीवब्रह्माभेदोपस्थापकं तथा महावाक्यमपि।।
तथा चोत्तरतापनीये कं सर्वमिदमहमिति हो वा न्वेवमेवेदं सर्वं तस्मादहमिति सर्वाभि
धानं तस्यादिरयं मकारः स एव भवतीति उपक्रम्य सर्वे ह्येवराय।। मात्मेत्यादिना सर्वा
त्मत्वमुक्तं तस्मात्सर्वात्मकेनाकारेण सर्वात्मकमात्मानमविच्छेदित्यकारेण शोधित जी
वचिंतनं विहितं।। ब्रह्मैवेदं सर्वमित्युपक्रम्य स परमानंद इत्यंतेन परब्रह्मणः
सच्चिदानंदरूपत्वमभिधाय तस्य ब्रह्मणो नाम ब्रह्मेति तस्यासोयं मकारः स ए
व भवति तस्मान्मकारेण परं ब्रह्मान्विच्छेदिति मकारेण परब्रह्मचिंतनमभिधाय

57

२९ खिलमिदमितिउदयेवाहाविविक्तिसंतस्मादकारेणेममात्मानमभिव्यष्यमकारेणाब्रह्मणा
संदध्यादुकारेणाविविक्तिसंनिधाहिश्रूयते॥सचार्द्धमात्रात्मकोनादोऽमूर्त्तस्यपर
मकारणास्यवाचकःतथामूर्त्तिविशिष्टस्यापिवाचकः॥एवंलिस्थिरेवैतन्मात्राभिर
खिलंत्रिधा॥अभिधायशिवात्मानंबोधयत्यर्द्धमात्रयेति॥अत्रशिवशब्दःमूर्त्तिवि
शिष्टशिवपरइतिवाक्यशेषादवगम्यते॥तथासनत्कुमारसंहितायां॥ॐनमोभस्म
नेतस्मैपरस्मैविस्पष्टात्मने॥शम्भवम्मिथःसमाविष्टःस्त्रीपुंसैकरसात्मनइतिनर
नारीत्वंपुरुषंपरमेश्वरंप्रत्यक्षस्यसकलस्यशिवसोमेत्यापरस्परंक्लिष्टक्रम॥नमाभि
सप्तधात्मानंसप्तोंकारप्रकाशितमिष्कलं॥अस्यायमर्थः॥सप्तधात्मानंब्रह्मवि
ष्णुरुद्रेश्वरसदाशिवोमापरमेश्वरात्मनासप्तप्रकारमात्मानंसप्तोंकारप्रेक्षा २९

रप्रकाशितं नमामीत्यन्वयः॥ सप्रोंकारः अकारोकारमकारबिंदुनादशक्तिशांतात्म
स्तैर्यथाक्रमं प्रकाशितमित्यर्थः॥ शक्तिशांतप्रणवप्रतिपाद्ययोरुमामहेश्वरयोः
सदाशिवदेवनादवाच्यत्वमुक्तमुत्तरश्लोके॥ तन्तु शक्तिशांतयोर्नादावस्थावि
शेषरूपयोर्नादेंतर्भावमास्थायोक्तं॥ एवंच ब्रह्मादिपरमेश्वरांतानां सप्तानाम
पि पंचप्रणववोधितत्वोक्तिरविरुद्धेति॥ ब्रह्माणं प्रणम्यादौ विष्णुरुद्रमयीश्व
रं॥ सदाशिवं च सोमं च पंचप्रणववोधितं चेति सोममुमातत्सहितं परमेश्वरं चेत्य
र्थः॥ नमामि सप्तधात्मानमित्युपक्रमात्॥ देवं ब्रह्माणमेवादौ विष्णुं सोमं महेश्व
रं॥ सर्वकामसमृद्ध्यर्थमक्षरं प्रणवोदितमिति अत्र विष्णुं सोममित्यत्र सोमो मका
रार्थत्वाद्रुद्रः महेश्वरमित्य ईशानो वाच्यः शिव उक्तः॥ अभिध्याय शिवात्मा

59

त्वं बोधये सार्द्धमात्रयेति वचनात् ॥ अक्षरं परमं ब्रह्म ब्रह्मविष्णुसोममहेश्वरात्मना
चतुर्द्धा विभक्तं प्रणवं बोधितमकारोकारमकारार्द्धमात्रात्मना चतुर्द्धा विभक्तं प्रण
वं बोधितमित्यर्थः ॥ पूर्वोदाहृतश्लोके प्रणवस्य पञ्चधा समवा विभागमुररीकृ
त्य प्रवृत्तौ ॥ अयं श्लोकः प्रणवस्य चतुर्द्धा विभागमुररीकृत्य प्रवृत्त इति मंतव्यं ॥
तदुत्तरश्लोकः पंचविंशतितत्वाख्यभूतग्रामसमाकुलं ॥ नानात्रिमूर्त्तिसञ्ज्ञं
वै वंदे शास्त्रप्रबोधितम् ॥ अन्योपश्लोकः कर्त्तारं नित्यनिर्मलविग्रहं ॥ सोमं सोमे
श्वरं वंदे शर्वपद्ममहानिधिमिति ॥ सोमं सोमेश्वरमिति सोमस्य मकारार्थत्व
तगुणारूढस्य ईश्वरमधिष्ठातारं सोमं सांबमूर्त्तिधरं तुर्यमर्द्धमात्रावाच्यं वं
द इत्यन्वयः ॥ तथा वैतैः श्लोकैरुपक्रमोपसंहारादिभिः पर्यालोचितैर्नादवा ३०

च्यस्य परमकारणस्य सांबमूर्त्तिविशिष्टत्वमेव गम्यते ॥ या प्रणवकाले ध्येया सा स्व
नत्कुमारसंहितायामेव प्रदेशांतरे सदाशिवादिब्रह्मांतेभ्यः शांत्यादिकलाधिष्ठात
भ्यः परा मूर्त्तिः प्रणवध्येया नारदवाच्या प्रदर्शिता ॥ पराशर उवाच ॥ साधु साधु महा
भागा यत्पृष्टं परमर्षिभिः ॥ नावेदविदुषामेवं प्रश्नः प्रादुर्भविष्यति ॥ पूर्वं श्रीनारदे
नोक्तं प्रभाकरन्तपं प्रति ॥ प्रभाकरो महाराजः कांचीचोलविश्रुतः पुरा ॥ स श्रीमाधव
मंत्रं तमन्त्रकोटिभिः शुभभावनैः ॥ तस्य देवं सदा तुष्टः साक्षाच्छ्रीमाधवः स्वयं ॥ म
नोरथान्निःशेषान्संकल्प्यान्संप्रयच्छति ॥ यत्तत्पाशुपतं ज्ञानं परं पंचार्थसंयु
तं ॥ पंचभिः सषडंगैर्वेदैरुपनिषद्भिः ॥ अस्याश्रमपदं पुण्यं तात्पर्यादभिधी
यते ॥ तदप्युपादिशत्तस्मै गुरुः श्रीमाधवो हरिः ॥ दर्शयामास भगवानेकांते

61



३१ मधुसूदनः॥ पंचभ्योदेवमुख्येभ्योब्रह्मादिभ्यःपरंहरिः॥ स्वयमेवस्वमात्मानं
सहितंक्षमयोमया॥ अकार्यकरणाद्वैतनिरस्तकल्याणरूपया॥ महामोहतमोहा
निस्वच्छंदज्योतिरात्मना॥ सूक्ष्मानंपरंज्योतिःशिवंसर्वेशमीश्वरं॥ सूक्ष्मात्सू
क्ष्मतरंशब्दपरिणामार्थसंज्ञकं॥ एवंभूतंहिधात्मानंविष्णोर्यत्परमंपदम्॥ द
रूंविपाप्मंपरमंगहनंदेहसंस्थितं॥ जन्ममृत्युजरातीतंसाक्षाद्विष्णोःपरंपदं॥
चतुर्बाहुमुदारांगंत्रिनेत्रंसर्वशंकरं॥ अजंनित्यंविभुंसूक्ष्मंनिष्टप्तकनकप्र
भं॥ प्रसन्नोभगवान्देवस्तत्रश्रीमाधवोहरिः॥ स्वात्मानंदर्शयामाससंस्कारां
लेन्द्रपायवै॥ दर्शयित्वास्वमात्मानंतदात्मानंपरंशिवं॥ निष्कलंनिष्क्रियंशांतंनि
रवद्यंनिरंजनम्॥ वस्तुमात्रमुमाशक्तिव्यापिनंवशिवंशिवं॥ शक्तिशक्तिमता ३१

स्थानं मिथोन्यामाखिलास्पदं ॥ पयोरसमिवाद्वैतं तदात्मानमनामयं ॥ विद्वानेम
स्मनसततं पुनरस्योपदिष्टवान् ॥ स तथा ज्ञानवान् राजा तत्प्रसादात्प्रभाकरः ॥ त
मेवाशयध्येवं तत्र श्रीमाधवे वसन् ॥ अप्राप्येव प्रोत्तमणतं राजा विष्णोः प्रसाद
तः ॥ प्राप्य पाशुपतं ज्ञानं भक्त्या निर्वाणमेष्यतीति ॥ इत्थं वियापमित्यनेन सांबमू
र्त्तिविशिष्टस्य परमेश्वरस्य दहराकाशरूपत्वमुक्तं तच्च दहराकाशं यो वेदादौ स्व
रः प्रोक्त इत्युत्तरमंत्रेण प्रणवप्रकृतिन्तनादवाच्यमित्युक्तमिति नादार्थस्य प
रमेश्वरस्यैषा मूर्त्तिरित्यवगम्यते ॥ किंच तत्ते पदं संग्रहेण ब्रवीम्योमित्येतदिति
प्रणववाच्यं परं ब्रह्म तस्य सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति मुक्तप्राप्य
त्वेन निर्दिष्टं ॥ तच्च परमं पदं उक्तमूर्त्तिविशिष्टशिवरूपमित्युक्तमित्युक्तमूर्त्तिर्वि

३२ श्लिष्टस्य परमेश्वरस्य प्रणववाच्यत्वसिद्धिरिति स्कांदे ॐकारेण प्लवेनैव संसाराब्धिं
तरिष्यति॥ उमार्द्धविग्रहो देवः सांबः साम्बादिलक्षणः॥ संसारतारकस्यास्य प्रण
वस्यार्थ उच्यते॥ उमासहायमोमर्थं विभुं साक्षात्त्रिलोचनं॥ नीलकंठं प्रशांतं तं
ध्यायेन्नित्यमतंद्रितः इति॥ तथा योगयाज्ञवल्क्ये॥ प्रणवस्य तु नादांते परमानं
दविग्रहं॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं॥ चेतसा संप्रपश्यति सेतः सं
सारभेषजमिति॥ नादांतवाच्यत्वेन विद्यमानस्य परब्रह्मणः कृष्णपिंगलतो
त्वोमामहेश्वररूपत्वाभिधानेनोमायाऽपि नादवाच्यत्वं प्रदर्शितं॥ एवं च सति
हृदयपुंडरीकोयास्पदहरशब्दवाच्यस्य यो वेदादौ स्वरः प्रोक्तः इति मंत्रेण प्रणव
प्रकृतिभूतनादवाच्यस्य महेश्वरस्य ऋतं सत्यमित्यादिमंत्रेण निर्दिष्टस्य कृ ३२

ष्णपिंगलस्तोत्स्यामायाऽपि नारदवात्स्यलयाज्ञिवल्क्यवरदेववादाख्यप्रणवार्थत्वेनानुसंधे
यत्वे तात्पर्यमस्य वाक्यस्यानेन याज्ञवल्क्यवचनेन प्रदर्शितं॥ योवेदादाविलिमंत्रेतस्य
प्रणवस्य स्वप्रकृतिभूतनादे विलीनस्य यः परो वाच्य इत्यर्थो द्रष्टव्यः॥ इदं परस्तत्प
र इत्यादि प्रयोगे लरर्थे ऽकवदर्शनात्परशब्दप्रयोगस्य॥ एषां कृतं सत्यमित्यादि योग
याज्ञवल्क्यवचनप्रतिपाद्याम्नर्त्ति ब्रह्मादिसशक्तिवांलेभ्यः परेत्यवगम्यते॥ ब्रह्मादि
कार्यरूपाणि स्वे स्वे संहृत्य कारणे॥ अस्मिन्नर्थे वदंत्यन्ये योगिनो ब्रह्मवादिनः॥ प्रणवे
नैव कार्याणि स्वे स्वे संहृत्य कारणे इत्यादि एवं वचनसंदर्भात्कार्याणि ब्रह्मादिसश
क्तिवांलानि कार्यब्रह्माणी इत्यर्थः॥ याज्ञवल्क्य एव प्रदेशांतरे अथवा परमात्मा
नं परमानंदविग्रहं॥ गुरूपदेशादिज्ञेयं पुरषं कृष्णपिंगलं॥ ब्रह्म ब्रह्मपुरे गा

65



३३

गिर्द्हराख्ये एवमध्यमे ॥ अभ्यासात्संप्रपश्यंति संतस्तत्त्वं तथा कुर्विति ॥ तथा योग
वासिष्ठे नादांते वृषभध्वजमित्यादि ॐमित्येकाक्षरे मंत्रे स्थितः सर्वगतः शिवः ॥ वे
दे धर्मः प्रतिष्ठित इत्यादाविव नादांते वृषभध्वजमित्यत्रापि नादांते तत्प्रतिपाद्यतासं
बंधेन स्थितमित्यर्थो द्रष्टव्यः ॥ विस्तरस्तु प्रणवार्थप्रकाशिकायां द्रष्टव्यः ॥ व्यक्ताव्य
क्तोच्चपुरुषस्तिस्रो मात्राः प्रकीर्तिताः ॥ अर्धमात्रापरं ब्रह्म ध्येयं यन्मोक्षकांक्षिभिरिति
मार्कंडेये श्रूयते ॥ अर्धमात्रापरं ब्रह्म ध्येयं यन्मोक्षकांक्षिभिरित्यत्र मूर्तामूर्तं च
ब्रह्म यथाधिकारं ध्येयमिति व्याख्येयमित्यलं प्रसंगागतप्रपंचेन प्रकृतमनुसरा
मः ॥ शिवरूपतया सर्वं यो वेद स हि तत्त्ववित् ॥ अशिवं वेद यत्किंचित्स इव परिमोहि
तः ॥ शिवादन्यतया किंचिदपि यो वेद सोऽधमः ॥ शिवस्यैवायं चाकारं हि स परमेश्वरः ॥ ३३
विज्ञेयः

66

ज्ञिवस्वरूपतया सर्वं यस्य भाति स्वभावतः ॥ स्वेच्छाचारसमाचारस्तस्य चार्चां वश्य
लिन इति स्फुरदेव किंच यस्मिं द्यौः पृथिवी चांतरिक्षमोतं मनः सह प्राणैश्च
सर्वैः ॥ तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथेति वाक्यमपि त्रिविधनि
ष्प्रपंचभावनायां प्रमाणं ॥ अत्र तमेवैकं जानथ इति न ज्ञानं विधीयते तस्य
प्रमाणवस्तुपरतंत्रस्याविधेयत्वात् किंतु ध्यानं विधीयते ॥ तच्च तमेवैयत्र धा
रणक्रियालक्ष्यनिर्दिष्टे ब्रह्मातिरिक्तवस्तुवैशिष्ट्याविषयकत्वे सति ब्रह्मवि
षयकत्वमित्यवगम्यते ॥ इति त्रिविधाभावस्याद्वचनात्सिध्यतीति ॥ सा च भाव
ना प्रणवाभ्यासपूर्विकेति ॥ प्रणवो धनुः ॥ शरो ह्यात्मा ब्रह्म तल्लक्ष्यमिति पूर्व
वाक्यपर्यालोचनया ॐ मित्येवं ध्यायथ आत्मानमित्युत्तरवाक्यपर्यालोचनया

67

नावगम्यते ॥ तथा श्रुत्यंतरं ॥ स्वरेणासंधयेद्योगमस्वरं भावयेत्परं ॥ शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छतीत्यादि ॥ तथा प्रणवेन परंब्रह्म ध्यायेत ब्रह्मविद्भवतीति शौनकश्रुत्ये ॥ क तथा प्रणवे पर्यवसितो भवेदित्युत्तरतापनीये ॥ तथा विष्णुपुराणे स्वाध्याय संयमाभ्यां हि दृश्यते पुरुषोत्तमः ॥ स्वाध्यायाद्योगमध्यास्य योगात्स्वाध्यायमभ्यसेत् ॥ स्वाध्याययोगसंपत्त्या परमात्मानमीक्ष्यत इति ॥ आनंदादयः प्रधानस्येत्यधिकरणन्यायेन सत्यज्ञानसुखात्मकत्वात्मत्वब्रह्मत्वादीनुपसंहृत्य अक्षरधियांत्ववरोध इत्यधिकरणन्यायेन स्थूलत्वादिनिषेधांश्चोपसंहृत्य तैः शाकमीघसंसृष्टं ब्रह्म ध्यातव्यं ॥ ननु निषेधानामानंत्यादनुपसंहारः ॥ प्रतिषेध्यप्रपंचोत्र मूर्तं वा मौलिकानि वा ॥

इंद्रियाणिशरीरंवाविद्यावाविश्वकारणं॥येषांपरिमितित्वेननिषेध्यपरिमेयतः॥साकांक्षेषु
निषेध्येषुगच्छेयुः प्रत्येयपरइत्यत्रैवंविचार्यते॥किंतद्ब्रह्माहमितिमंतव्यंमत्तोभिन्नोभि
तिकिंतावदात्मंमत्तोभिन्नमितिप्रतिपत्तव्यं॥पृथगात्मानंप्रेरितारंचमत्वाजुष्टस्ततस्ते
नामृतत्वमेतीतिवचनाज्जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोकइति
चसर्वज्ञत्वसत्यसंकल्पत्वादिविशिष्टब्रह्मणस्तद्विपरीतजीवभावानुपपत्तेश्चेत्यतो
च्यतेतद्ब्रह्माहमितिज्ञात्वासर्वबंधैःप्रमुच्यतइतितद्ब्रह्माद्वयमस्म्यहमितिचब्रह्म
वाइदमग्रआसीत्तदात्मानमेवावेत्॥अहंब्रह्मास्मीतितस्मात्तत्सर्वमभवत्।अथ
योन्यांदेवतामुपास्तेन्योसावन्योहमस्मीतिनसवेद॥आत्मानंचेद्विजानीयादय
मस्मीतिपुरुषः॥तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृतं॥यदेतमनुपश्यत्यात्मा

३५

नं रेव मंजसा ॥ तमेवैकं जानथ आत्मानं नात्र काचन भिदास्ति नैवात्र काचन भिदास्ति ॥
अन्ये भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः स मृत्युमाप्नोति उदरमंतरं
कुरुते ॥ अयमात्मा ब्रह्म तत्त्वमसीत्यादिश्रुतिशतेभ्य अहंत्वेनैव ब्रह्मेति प्रतिपत्तव्यं ॥
तत्त्वमेव त्वमेव तदिति वचनात् ॥ व्यतिहारेणापि प्रतिपत्तव्यं ॥ तदनुसारेण पृथगा
त्मानं प्रेरितारं च मत्वेति वाक्यमेवं व्याख्येयं ॥ आत्मानं जीवं शरीरेन्द्रियादिभ्यः पृथ
ग्भूतं प्रेरितारमीश्वरं चाभेदेन मत्वेत्यत एव गारुडेय्यः सर्वं खल सत्त्वस्थो यश्चास
र्वगुहाशयः ॥ यश्च सर्वशरीरेषु दृश्यः सोहमस्मीति चिंतयेदिति ॥ क्षेत्रज्ञं चापि मां
विद्धि सर्वक्षेत्रेषु भारतेति भगवद्गीतावचनमप्युपपन्नं यत्तु जुष्टं यदा पश्य ३६
त्यन्यमीशमिति वचनाज्जीवभिन्नेश्वरज्ञानं मोक्षसाधनमिति तच्चरूस्मिन्

भगवो विशाले सर्वमिदं विशालं भवतीत्युपक्रमात् ॥ ब्रह्मैवेदममृतं पुरस्तादित्यादिना मध्ये सर्वात्म्यप्रतिपादनात्स यो हैतत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्युपसंहारस्थफलवचनानुसाराच्चान्यमीशमित्यस्य प्रपंचविलक्षणमीशमिति व्याख्यानस्यैव युक्तत्वात् ॥ तथा ॥ तद्भावभावनापन्नस्ततोसौ परमात्मना ॥ भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥ विभेदजनकेज्ञाने नाशमात्यंतिकं गते ॥ आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीति वचनाच्चाभेदभावनाजन्यज्ञानमेव मोक्षसाधनमिति ॥ नन्वज्ञानमिथ्याज्ञानानां स्वसमानविषयकविशेषदर्शननिवर्त्यतया शोधितत्वंपदार्थविषयकसाक्षात्कारादेव सांख्यादिमत इव निष्टरूपपत्तौ तत्पदवाक्यं च व्यर्थं ॥ न च सोयं देवदत्त इति वाक्यजन्यदेवदत्तैक्यस्य देवदत्तस्वरूपत्वेन देवदत्तत्वस्वरूपत्वे

71

३६

न चाऽद्वैतपरश्रुत्युपस्थितावपि न पदान्तरवैयर्थ्यं॥ तदिदं पदं विमतिजन्यतावच्छेदक
जातिविरोधविशिष्टज्ञानस्यैव देवदत्तादेः संशयविपर्यासादिनिवर्त्तकत्वादिति॥ य
था तत्त्वमस्यादिपदार्थविचारादिप्रयोज्यविजातीयज्ञानस्यैव मिथ्याज्ञानादि
निवर्त्तकत्वेन न पदान्तरवैयर्थ्यमिति वाच्यं॥ एवं तर्हि समानविषयकत्वस्य निवर्त्त
कतायामतंत्रत्वेन जीवभिन्नेश्वरज्ञानस्यापि विजातीयस्य ज्ञानत्वाद्येवं ज्ञातिमत्त्वं तमे
तीति शास्त्रानुसाराज्जीवविषयकमिथ्याज्ञानादिनिवर्त्तकत्वं संभवेद्यथोऽभेदभावना
जन्यसाक्षात्कारस्यैव निवर्त्तकत्वाग्रह इति चेत्सत्यं शास्त्रप्रामाण्यादुपक्रमाद्यवधृ
ततात्पर्यकतत्त्वमस्यादिशास्त्रावगताभेदगोचरविचारभावनादिजन्यसाक्षात्कार ३६
स्यैव मिथ्याज्ञानादिनिवर्त्तकत्वमंगीक्रियत इति न काचिदनुपपत्तिः॥ एवं सगुण

ब्रह्मविषयत्वाद्दहरशांडिल्यविद्यादिवदुपास्यं मत्वाहं ब्रह्म च मदभिन्नमिति॥ परस्परव्यतिहारेणानुचिंतनं कार्यं व्यतिहाराधिकरणे ब्रह्मविषयत्वकृताहंग्रहोपासनेषु जीवेश्वरयोः परस्परव्यतिहार उपसंहर्त्तव्य इति नाप्यकारे सम्भवात्॥ तथा च कौर्मे सर्वसंगान्परित्यज्य ज्ञात्वा मायामयं जगत्॥ अद्वैतं भावयात्मानं द्रक्ष्यसे परमेश्वरमिति॥ आत्मेति तूपगच्छंति ग्राहयंति चेति सूत्रात्त्वं वाहमस्मि भगवो देवतेऽहं वै त्वमसीति तच्छ्रुतजाबालश्रुतेश्च यदि शारीरशारीरीभावनिबंधनं सामानाधिकरण्यं॥ तदानीमहं वै त्वमसीति निर्देश उपपद्यते त्वंशब्दनिर्दिष्टे परमेश्वरे शारीरिपर्यंताहंशब्दस्य त्वस्योपपत्तेः॥ त्वं वाहमस्मीति निर्देशस्तु नोपपद्यते॥ अहंशब्दनिर्दिष्टे परमेश्वरशारीररूपे स्वस्मिन्परमेश्वरवाचिनस्त्वंशब्दस्य त्वस्यानुपपत्तेः॥ शारीरवाचिनां

हिशरीरिपर्यंतत्वं व्युत्पत्तिसिद्धं॥ ननु शरीरिवाचिनां शरीरपर्यंतत्वं अत उद्दूयात्मकर्म
र्मव्यतिहारेण स्वस्मिन्परमेश्वरदृष्टिः परमेश्वरे स्वदृष्टिश्चात्र विधित्सितेत्यवसी
यते॥ ननु तथा सत्युत्कृष्टे निकृष्टदृष्टिरप्यत्र विधेया स्यान्न चेष्टापत्तिर्ब्रह्मदृष्टिरु
त्कर्षादिति न्यायविरोधात्तस्माद्वाक्यद्वयेपि त्वंशब्दोपस्थितगुणविशिष्टपरमेश्व
रविषयौ॥ अहंशब्दो स्वशरीरकत्वविशिष्टपरमेश्वरविषयोऽस्मच्छरीरोत्तदे
हस्य समर्पणाहंत्वंशब्दमात्रप्रयुक्तो न त्वहंत्वंशब्दयोः स्यात्त्वपरमेश्वरत्वप्रयुक्तो
र्विति व्याख्यात्रा तु मुच्चितमिति चिन्त्यमेवं॥ तथा सत्येकेन वाक्येन स्वांतर्यामिणः परमे
श्वरस्य चाभेदसिध्या वाक्यांतरवैयर्थ्यापत्तिः॥ नचाभेदप्रतिपत्तिदार्ढ्यार्थं
वाक्यद्वयं न्यायहेतुभेदभ्रांतिवासनानुवृत्त्यभावेन तद्दार्ढ्यापादनस्य निष्प्रयो

ञनत्वात्॥ तस्माद्यद्वावकं तदेवत्वमित्यत्रैव वाक्यद्वयस्यापि कर्मव्यतिहारेणा
वगतिविधानार्थं त्वमेव युष्मदं अतद्दृष्टिः सद्रूपीति सामान्यव्यायस्त्व विशेषव
चनेनायोयते॥ एवं जीवात्मवाक्यद्वयत योऽहं सोऽसौ योऽसौ सोऽहमस्मीति वाक्यद्व
यमपि अन्योन्याभेददृष्टिविधानपरं तथैव महावाक्यविषयाऽकृताक्यत्वेनेत
व्यं॥ यद्यपुपासितुर्जिन्न एव परमेश्वरस्तथापि मांनिष्क्राड्डिन्तो गारुड इव चिर
विरंतरासंविताभेदभावनासाध्यसंसिद्धेन प्रतीतेन स्वस्वरूपत्वेनानुसंदधी
ति॥ तत्त्वमसीत्यत्र तंशब्दनिर्दिष्टे प्राग्वर्णितजगत्कारणत्वादिविशिष्टपरमे
श्वराभेदो बोध्यत इत्यसिशब्दयोगात्त्वंशब्दगम्यते॥ अत त्वंशब्दसंबोध्यमात्रजी
वपरो मन्तुर्तदंतर्यामिपर इत्यनुपगंतव्यं॥ त्वंबोध्यं मति स्वात्मन इव स्वात्मयी

मितः स्वानुभवेन प्रसिद्धं॥ तत्राभावेन तस्य तदर्थं प्रयत्नोद्देश्यताया अनर्हत्वात्॥ प्रकृतस्य स
द्रूपस्य परमेश्वरस्य कथंचित्स्वांतर्यामितया प्राग्गुपरिष्टत्वसमर्थनेपि तत्तत्केदसं
ज्ञानुदयेन तदभेदबोधनानपेक्षणादतस्तत्त्वमसीति वाक्यं स्वात्मनि ब्रह्माभेदबोध
परमित्यभ्युपगन्तव्यं॥ तथा कौषीतकीवाक्यमप्युक्ताभिप्रायकमेव॥ अथातो वैराग्य
संस्कृते शरीरे ब्रह्मयज्ञनिष्ठो भवेत्॥ तदु ह वात्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्य इत्या
दिना ब्रह्मज्ञानसाधनानि श्रवणमननादीनि विधाय इदं ब्रह्मेदं क्षत्रमित्यादि इदं स
र्वं यदयमात्मेत्यनेन सार्वात्म्यमुक्त्वा तमेतं वेदानुवचनेनेति वाक्येन तज्ज्ञानसाधनत्वे
न वेदानुवचनादिकं विधाय शांतो दांत इति वाक्येन तज्ज्ञानसाधनत्वेन शमदमादीन्यंत
रंगसाधनानि विधायकेन रूपेण स आत्मा द्रष्टव्य इत्याकांक्षायां तन्निर्द्धारणार्थमिदं

वाक्यं प्रवृत्तं तत्त्वमसीत्ययमात्मावगम्य अहं ब्रह्मास्मीति एतेन तत्त्वं स आत्मा अत
त्वमसीति गुरूद्दिष्ट इति सर्वं प्रलापोयास्तः ।। ननु जीवब्रह्मणोर्भेदादहं ब्रह्मास्मीती
श्वरोस्मीति भावना भ्रमरूपा स्यात्सा कथं मुक्तिहेतुरिति चेन्न ।। यथा कीटस्य कीटत्व
निवृत्तिपूर्वकं भ्रमरत्वप्राप्तिर्भ्रमराहंभावसाध्या ।। एवं जीवस्यानभिव्यक्तोपास्ये
श्वरतुल्यैश्वर्यकत्वरूपजीवत्वनिवृत्तिपूर्वकं निरस्तसमस्तदोषकल्याणगुणावि
र्भोगरूपेश्वरत्वप्राप्तिरीश्वराहंभावसाध्येति देवो भूत्वा देवानप्येति श्रुतिरवगम्यते
अथ खलु क्रतुमयः पुरुष इति श्रुत्यंतरमपि तत्तदुपासकस्य तत्तुल्यैश्वर्यप्राप्ति
रूपदेवभावं बोधयति देवो भूत्वेतिवत् ।। तथा वाजसनेयके मंडलब्राह्मणे तं यथा
यथोपासते तदेव भवति तद्धैतान्भूत्वावतीति तस्मादेवमेवंवित्सर्वैरेवैतैरुपासीत

३९

सर्वं हैलङ्कवलि सर्वं हैनमेलङ्कलावलीलि॥ तथा च स्मृतिः प्राणायामैर्दहेद्दोषान्धार
णाभिश्च किल्बिषान्॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणानिति तस्या
यमर्थः प्राणायामाभ्यासेन वालपित्तादिधातुवैषम्यजनितान्दोषान्धारणाभिश्च कि
ल्बिषान्पापानि विषयेभ्य इंद्रियाणां प्रत्याहारेणेंद्रियविषयसंसर्गजनितानि पा
पानि दहेत्॥ पापानां दाहो नामेंद्रियसंसर्गविषयरूपकारणविघटनेन तदुत्पत्तिप्रति
बंधः॥ अत्र दाहशब्दवाच्यः पवित्रत्वनाशो ध्यानेनानीश्वरान्गुणानिति फलाव
स्थायामाविर्भूतापहतपाप्मत्वादिगुणरूपस्य जीवस्य नित्याविर्भूतापहतपाप्मत्वा
दिगुणकेश्वरनिष्ठाभेदनिरूपकत्वेनेश्वरस्य च फलावस्थायामभिव्यक्तापहत
पाप्मत्वादिगुणकजीवनिष्ठाभेदनिरूपकत्वेन च ध्यानादित्यर्थः॥ अनीश्वरान्गुण ३९

78

नैश्वरश्चात्स्तद्व्यपहतपाप्मत्वादिगुणलक्षकस्तथा नेश्वरगुणविलक्षणान् अन
पहतपाप्मत्वात्सर्वज्ञत्वात्सत्यसंकल्पत्वाच्चारीन्देहेरित्यर्थः ॥ तथा च छांदोग्यश्रुतिः ॥ अ
थ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके भवति तथेतः प्रेत्य भवतीति एतद
नेनोक्तं भवति क्रतुमयः क्रतुः संकल्पः उपासनात्मयस्तत्प्रधानो यथाक्रतुर्यद्गु
णविशिष्टमीश्वरं जीवं च परस्पराभेदनिरूपकत्वेन चिंतयति स तथैव भवति ॥ अवि
भक्ततद्गुणको भवतीत्यर्थः ॥ यद्यपि तं यथा यथोपासते इति वाक्येन तच्छब्दनिर्दिष्टे
श्वरस्यैवापहतपाप्मत्वादिगुणकत्वेन चिंतनं ॥ प्रतीयते न तु फलावस्थायामभिव्य
क्तापहतपाप्मत्वादिगुणकजीवस्यापि चिंतनं तथापि फलावस्थायामभिव्यक्तापह
तपाप्मत्वादिगुणकजीवाभिन्नत्वेनोपासते इति व्याख्येयमुदाहृतछांदोग्यश्रुत्यनु

79

४०

सारात्॥ दुःखित्वरागद्वेषादिमत ईश्वराद्भेदनिरूपकत्वेन चिंतने तद्विपरीतगुणाना-
माविर्भावानुपपत्तेश्चेति॥ सप्रपंचभावनापि त्रिविधा॥ कृत्स्नस्य प्रपंचस्य ब्रह्मोपा-
देयत्वात् ब्रह्मतादात्म्यात् सर्वं ब्रह्मेति भावना प्रथमा॥ यथा सर्वांतर्यामितया पर-
मेश्वरस्तिष्टतीति भावना द्वितीया॥ तत्तत्पदार्थप्रतीकेनामाद्याशांत इव ब्रह्माभेदा-
हार्यारोपरूपेणाचिंतनारूपा तृतीया॥ आद्यभावनायां तु सर्वं खल्विदं ब्रह्म तज्ज-
लानिति शांत उपासीतेति वाक्यं मानं॥ अस्यायमर्थः॥ सर्वप्रपंचानुवादेन स्वोपादान-
ब्रह्मतादात्म्यमनेन बोध्यते॥ तज्जलानीतिवाक्येन प्रपंचोत्पत्तिस्थितिलयकारणत्वे-
न ब्रह्मणः प्रपंचोपादानत्वं प्रतिपाद्यार्थात्प्रपंचस्य तदुपादेयत्वं प्रतिपाद्य प्रपंचस्य ब्र- ४०
ह्मतादात्म्यमुपपादितं॥ स क्रतुं कुर्वीतेति वाक्येन विहितोपासनानुवादेन शांत उ-

80

पासीतेति वाक्येन तदंगत्वेन शमगुणो विहितः ॥ तत्सिध्यर्थं च सर्वं खल्विदं ब्रह्मेति वा-
क्येन प्रपंचस्य ब्रह्मतादात्म्यमुक्तम् ॥ न हि प्रपंचस्याचिंत्यं ब्रह्मतादात्म्यं रागद्वेषनि-
वृत्तिरूपशमाय कल्पते ॥ किंतु चिंत्यमानमेव ॥ तथा च शमप्रेप्सुः सर्वं जगद्ब्रह्मता-
दात्म्येन चिंतयेदिति विधिरुन्नीयते ॥ तथा च विष्णुपुराणे ॥ विस्तारः सर्वभूतस्य
विष्णोः सर्वमिदं जगत् ॥ द्रष्टव्यमात्मवत्सर्वमभेदेन विचक्षणैः ॥ तथा तत्रैव ॥ अहं
हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातं ॥ ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वंद्वगदा भवंतीति ॥ तथा च भागवतमपि नरेष्वभीक्ष्णं मद्भावं पुंसो भाव-
यतोऽचिरात् ॥ स्पर्धासूयातिरस्काराः साहंकारा वियंति हीति ॥ न च स क्रतुं कुर्वीतेति
मनोमयत्वादिविशिष्टब्रह्मचिंतनेन सर्वं खल्विदं ब्रह्मेति वाक्येन प्रपंचस्य ब्रह्मत

४२

च्चिंतनं चेति विधेयमिति विधेयभेदाद्वाक्यभेद इति वाच्यं ॥ यस्यां यस्यां विद्यायां य
स्मिंकर्मणि तपसि वा ज्ञातेरंगत्वं तत्सर्वार्थत्वस्य वाक्यप्रमाणसिद्धत्वेपि प्रकरण
सामर्थ्यात्प्रकृतोपासनांगत्वस्यापि वक्तव्यतयांगप्रधानविध्योः प्रयाजदर्शपूर्णमा
सविध्योरिव वाक्यैकवाक्यत्वेन वाक्यभेदाभावात् ॥ किंच फलविधिभेदस्थल एव
वाक्यभेदादिदोषो न त्वनुमिताविधायकवाक्यस्थल इति नात्र वाक्यभेदप्रसक्तिः ॥
किंच नात्र शमोद्देशेन सगुणस्य ब्रह्माभेदेन दर्शनं विधीयते सर्वं ब्रह्मेति पश्यतो राग
द्वेषविषयाभेदेन सामर्थ्यादेव शमसिद्धेः ॥ तथा च विष्णुपुराणे ॥ सर्वभूतात्मके ता
त जगन्नाथे जगन्मये ॥ परमात्मनि गोविंदे मित्रामित्रकथा कुतः ॥ तस्माच्छमो
द्देशेनोक्तभावनाविधानपक्षे सामर्थ्यात् साधनत्वपक्षेपि शमार्थिनोक्तभाव ४२



नानुष्ठेयेति सिद्धं ॥ द्वितीया भावना सर्वत्रांतर्यामित्वेनेश्वरचिंतनारूपा ॥ तदुक्तं वि
ष्णुपुराणे ॥ परेषां योनया पापि चिंतयत्यात्मनो यथा ॥ तस्य दुःखागमस्तात हेतुभावा
न्नविद्यते ॥ सोऽहं न पापमिच्छामि न करोमि वदामि वा ॥ चिंतयन्सर्वभूतस्थमात्मन्यपि
च केशवमिति ॥ तथा भागवते ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भ
गवत्यात्मन्येष भागवतोत्तम इति ॥ तथा वायवीयसंहितालिंगपुराणयोः ॥ वि
ग्रहं देवदेवस्य जगदेतच्चराचरं ॥ अष्टमूर्तेर्महेशस्य यस्माद्देहः समुच्यते ॥ स
र्वोपकारकरणं सर्वानुग्रहणं तथा ॥ सर्वाभयप्रदानं च शिवस्याराधनं विदुः
देहेनो यस्य कस्यापि क्रियते यदि निग्रहः ॥ अष्टमूर्तेरनिष्टं तत्कृतमेव न सं
शय इति ॥ कौर्मे स्थानेषु गेषु ये रुद्रं ध्यायेन्ति प्रणमेन्ति च ॥ तेषामष्टतनुर्ईबो

दृशाति परमं पदमिति ॥ चराचरस्य प्रपंचस्य परमेश्वरशरीरत्वमंतर्बहिर्व्याप्तेन पर
मेश्वरेणाधिष्ठेयत्वं तच्छरीरकत्वं चांतर्बहिर्व्याप्तत्वे सति तदधिष्ठातृत्वं निखिलच
राचरप्रपंचशरीरकत्वममूलशब्दवाच्यस्य परमेश्वरस्यांतर्यामित्वमवगम्य
ते ॥ एतदुक्तं भवति ॥ अष्टमूर्तिः परमेश्वरश्चराचरात्मकं जगदंतर्बहिर्व्याप्या
धिष्ठातृभावेन तिष्ठति जगत्तदधिष्ठेयमिति ॥ मुमुक्षूभिर्ध्येदिति विधिरस्मा
द्वचनादुंनीयते ॥ अष्टमूर्त्तयश्च पृथिव्यादिपंचमहाभूतानि सूर्याचंद्रमसा
वात्मा चेति ॥ तथा चाथर्वीयसंहितायां ॥ आत्मा तस्याष्टमी मूर्त्तिः शिवस्य प
रमात्मनः ॥ व्यापकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकं ॥ तथा च श्रुतिः ॥ य
आत्मनि तिष्ठन्नात्मानमंतरो यमयति यस्यात्मा शरीरं यो विज्ञाने तिष्ठन्विज्ञा

मंतरो यमयति यस्य विज्ञानं शरीरमित्यादिदीक्षितस्माष्टमशरीरत्वोक्तिस्तूर्व
विवक्षया वस्तुतस्तु जीवमात्रमेव शरीरमिति ॥ यद्यपि ब्रह्मात्मैकत्वज्ञानमेव
मुक्तिहेतुर्न तु सर्वत्रान्तर्यामित्वभावनं ॥ तथापीश्वरप्रसादद्वारा रागद्वेषादि
निवृत्तिद्वारा मोक्षहेतुज्ञानजनकत्वेन यस्तद्द्वारसमुच्चयत इत्यनेनान्तर्यामि
त्वभावनायाऽपि मोक्षहेतुत्वमुक्तं ॥ सर्वोपकारकरणमित्यनेन शिवमाराध
यिषुः सर्वप्राण्युपकारं सर्वानुग्रहणं सर्वत्राभयदानं च कुर्यादिति विधिरुन्नीय
ते ॥ आराधनं गौरवितिप्रीतिहेतुक्रिया प्राणिनो यस्य कस्यापीत्यनेनापि ईश्वरा
पराधपरिजिहीर्षुर्न कुर्यात्कस्योन्विद्रोहमित्यपि विधिरुन्नीयते युक्तं चैतत् ॥ लो
केऽपि शरीरगतपूजावधया शरीरिणि प्रीतिद्रोहजनकत्वदर्शनात् ॥ तथा वाय

४३

वीयसंहितायांशिवयोर्विभूतिकथनाध्यायेतयोर्विभूतिकथनानंतरंश्रूयतेशब्दजात
मशेषंतुधत्तेशार्वस्यवल्लभा।।अर्थस्वरूपमखिलंधत्तेमुग्धेंदुशेखरः।।यस्ययस्यप
दार्थस्ययायाशक्तिरुदाहृता।।सासाविश्वेश्वरीदेवीसससर्वेश्वरोहरः।।यत्परंयत्प
वित्रंचयत्पुण्यंयच्चमंगलं।।तत्तदाहुर्महावाहोतयोस्तेजोविजृंभितं।।यथादीप
स्यदीप्तस्यशिखादीपयतेगृहं।।तथातेजस्तयोरेतद्व्याप्यदीपयतेजगत्।।तदादि
शिवस्रूपंतंप्रपंचातिशायक्रमः।।सन्निकर्षक्रमवशात्तयोरितिपराश्रुतिः।।सर्वाका
रात्मकावेतौसर्वश्रेयोविधायिनौ।।पूजनीयौनमस्कार्यौवंदनीयौचसर्वदेतिसर्वा
कारात्मकावित्यस्यायमर्थःसर्वेप्रागुक्ताविभूतिभूताःपदार्थाश्चाकाराःशारीरभूता
ययोस्तौसर्वाकारात्मकावेतौ।।अथवासर्वाकाराणांसर्वपदार्थानामात्मतावेतरा
त्मभूतौ।।तथाचश्रुतिःयोरुद्रोअग्नौयोअप्सुयओषधीषुयोरुद्रोविश्वाभुवना ४३

विवेश तस्मै रुद्राय नमो अस्तु ॥ यो रुद्रो अग्नौ यो अप्स्वंतर्य ॐषधीर्वीरुध आविवे
श य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्तु ॥ इत्याभ्यां मंत्राभ्यां सर्वांत
र्यामित्वेन रुद्रान्वयं मन्वतो मंत्रद्रष्टुर्नमस्कारेण परमेश्वराराधनमवगम्यते ॥ त
था श्रीरुद्रेपि नमः शष्प्याय च फेन्याय चेत्यादिवाक्यैः सर्वांतर्यामित्वेन व्यवस्थि
तस्य रुद्रस्य नमस्कारेणाराधनं मंत्रद्रष्टुरवगम्यते ॥ अत्र यत्प्रपंचस्योपत्यर्थं कलाभा
वेनांतर्यामित्वेनाभिव्यक्तिरेवार्थ इति मन्तव्यं ॥ निखिलप्रपंचस्यांतर्यामिणा अर्च्यो
दिवदुपासनाधिष्ठानं तथा सर्वं जगन्नमस्कारोतीति मंत्रद्रष्टा ॥ नमस्ते अस्त्वायते न
मो रुद्रपरायते नमो यत्र निषीदसीति ॥ यत्र प्रपंचेंतर्यामित्वेन निषीदसि तिष्ठसी
यर्थः ॥ तथा श्वेताश्वतरे ॥ यो देवो अग्नौ यो अप्सु यो विश्वं भुवनमाविवेश ॥ य ॐष
धीषु यो वनस्पतिषु तस्मै देवाय नमो नमः ॥ अत्र देवशब्देन एको हि रुद्रो न द्विती

४४

पायतस्फुर्यद्रमाह्लोकानीज्ञातईशानीतिदिस्मृतरमंत्रउच्यमानःपरमेश्वरउमासहा
यंपरमेश्वरमितिप्रस्तूयश्रूयते॥ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि॥
संपश्यन्ब्रह्मपरमंयातिनान्येनहेतुनेति॥ इदमप्येतदर्थाभिभावनार्थमानं॥ एत
मेवबह्वृचामहत्युक्थेमीमांसंतएतमग्नावध्वर्यवएतंमहाव्रतेछंदोगाएतमस्या
मेतंदिव्येतंवायावेतमाकाशमेतमप्स्वेतमोषधीष्वेतवनस्पतिष्वेतंचंद्रमस्येतंन
क्षत्रेष्वेतंसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षतइतिकात्यायनश्रीहेतरीयाध्यायप्रकी
र्णकेपठ्यते॥ पंथानमभिमंत्रयतेनमोरुद्रायपथिषदेस्वस्तिमासंपादयेतिचतुष्प ४४
थमभिमंत्रयतेनमोरुद्रायचतुष्पथेस्वस्तिमासंपादयेतिनदीमुत्तरिष्यन्नभिमंत्र
यतेनमोरुद्रायाप्सुषदेस्वस्तिमासंपादयेतिनावमारोक्ष्यन्नभिमंत्रयतेसुनावमि

संतरिष्यन् अभिमंत्रयते सुत्रामाणमिति वनमभिमंत्रयते नमो रुद्राय वनसदे स्वस्ति
मा संपादयेति गिरिमभिमंत्रयते नमो रुद्राय गिरिषदे स्वस्ति मा संपादयेति श्मशानमभि
मंत्रयते नमो रुद्राय पितृषदे स्वस्ति मा संपादयेति गोष्ठमभिमंत्रयते नमो रुद्राय श
कृत्पिंडसदे इति यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयात् रुद्रो ह्येवेदं सर्वमिति श्रुतेः॥
अत्र सर्वान्तर्यामितया सर्वत्र रुद्रान्वयं प्रदर्श्य ऐहिकामुष्मिकस्वस्त्ययनाय नमस्का
रेणाराधनपूर्वकं स्वस्त्ययनप्रार्थनाबोधनात् सर्वान्तर्यामिण ईश्वरस्य सर्वभूतेष्वा
राधनं प्रदर्शितं॥ तथा चान्यत्रापि सर्वभूतस्थमेकं नारायणमिति एवमादीन्यंतर्या
मिविषयकाणि वचनानि तत्र तत्रान्तर्यामिण ईश्वरस्य ध्याननमस्कारादिभिराराध
नार्थानि श्रेयोर्थिनामिति॥ गीतास्वपि भूतभावन भूतेश देवदेव जगत्पते॥ नमस्कु

४५

र्महस्यत्रोषेणादिव्याख्यात्मविभूतयः॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठ
सीति विभूतिविषयकः प्रश्नः प्रवृत्तः॥ विभूतिप्रश्नस्य किं प्रयोजनमित्यस्यामाकांक्षायां
कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन्निति श्लोकार्द्धं प्रवृत्तं॥ चिंतनं तु द्विविधं
अध्यात्मं हृदयादिषु ध्यानं ध्यानादितरस्य वा स्वार्थेष्वीश्वरचिंतनं चेति॥ तत्र वा
स्वार्थचिंतनेन चिंतनीयेश्वराधिष्ठानभूतानर्थान्पृच्छति केषु केष्विति तस्यायमर्थः
केषु केषु च भावेषु चिंत्योसि अंतर्यामितेन नामामयाघाङ्गा॥ तद्व केषु केषु प्रतीकेषु आहो
र्याभेदेन वा चिंतनीयोसीति तदनेन सर्वांतर्यामित्वेनैकं चिंतनं प्रतीकोपासनं चेति
द्वितीयं पृष्टं॥ तत्र वा स्वार्थचिंतनेप्यधिकारी द्विविधः मंद उत्तमश्चेति तत्रोत्तमस्य
तु अथवा बहुनैतेन किं ज्ञातेन तवार्जुनेति कृत्स्नप्रपंचस्यैवोपास्यमानेश्वराधि ४५

ष्ठानत्वमुक्तं ॥ विस्तरेणात्मन इत्यनेन मध्यमाधिकारिकर्त्तव्येश्वरोपासनाधिष्ठानत्वेन
वक्ष्यमाणविभूतिमत्पदार्थविषयकः प्रश्नः कृतः ॥ विस्तरेणात्मनो योगं विभूतिं च जना
र्दनेत्यादिना ॥ उक्तप्रश्नोत्तरं हंत ते कथयिष्यामीति ॥ तस्माद्विभूत्यध्यायपर्यालोचनत
योऽमयविधोपासनं सिध्यतीति ॥ तथा कूर्मपुराणे ईश्वर उवाच ॥ शृणुध्वं ऋषयः सर्वे
शंभोर्माहात्म्यमुत्तमं ॥ यज्ञात्वा पुरुषा मुक्ता न संसारे विशंत्युत ॥ परात्परतरं ब्रह्मशाश्व
तं ध्रुवमव्ययं ॥ नित्यानंदं निर्विकल्पं तद्धाम परमं मम ॥ सूरयो यत्प्रपश्यंति विष्णोर्यत्प
रमं पदं ॥ तदहं परमं ब्रह्म चिदानंदमयं द्विजाः ॥ अहं ब्रह्मविदां ब्रह्मा स्वयंभूर्विश्वतो
मुखः ॥ मायाविनामहं देवः पुराणः पुरुषोत्तम इत्यारभ्य गतीनां मुक्तिरेवाहं परेशं पर
मेश्वरः ॥ गंगाहं सरितां मध्ये सिंधूनां क्षीरसागरः ॥ यच्चान्यदपि लोकेऽस्मिन्सर्वतेजो

४८

वलाधिकं॥ तत्सर्वं प्रतिजानीध्वं मम तेजोविजृंभितमिति॥ प्रभावातिशययुक्तानां शिववि
भूतित्वमुक्तं॥ तथा वायवीयसंहितायां॥ तं प्रपद्ये महेशानं सर्वज्ञमपराजितं॥ विभूति
ःसकलं यस्य चराचरमिदं जगदित्यनेन वैभवातिशययुक्तानां तदिहितानां च सर्वेषां त
द्विभूतित्वमुक्तं तदुक्तं च भगवद्गीतोक्तन्यायेन सर्वत्र सर्वेश्वरस्यैतत्तदंतर्यामित्वेन
वालंबनमात्रीके परमेश्वरचिंतनं केनोपनिषदि श्रूयते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपा
सत इति॥ तस्यायमर्थः॥ यदिदं जगदुपासते उपासकाः न तद्ब्रह्म किं तु वागाद्यभ्युदय
हेतुरेवं ब्रह्मेति प्रतिषेधः सर्वप्रसक्तिपूर्वकः॥ सत्यां गतौ नांतरिक्षे न रिच्यन्ति श्वेत इतिव
न्निस्यात्तु वागत्वकल्पनानुपपत्तेः॥ नहि स्वरूपेणाप्रपंचस्य ब्रह्मणः प्रसक्तिरिति ब्रह्माभेदारो
पलोपासनयाप्रसक्तं ब्रह्मा चेदं प्रतिषेधत इत्यस्माद्वचनात्प्रपंचरूपप्रतीके ब्रह्माभेदो

४८

92

पात्रमं सिध्यतीत्यवगम्यते ॥ प्रजापतीकेमंत्राधिष्ठारिणां ब्रह्मोपासनं क्रियते प्रश्नोपनिषदि
एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार इति ॥ एतद्धेवाक्षरं परमिति कठवल्ल्यां च ॥ कं ब्रह्म
खं ब्रह्मेतिच्छंदोग्यकेपि श्रूयत इति निरूपिताऽमूर्तौ ब्रह्मभावना ॥ अथ मूर्तौ विशि-
ष्ट ब्रह्मभावना निरूप्यते ॥ शिवविष्ण्वोरन्यतरमूर्तिविशिष्टत्वेन तदवतारमूर्तिविशिष्ट-
त्वेन वा ब्रह्मचिंतनं ॥ उमासहायं परमेश्वरं प्रभुं ॥ ॐ नमो नारायणाय शंखचक्रगदाध-
रमित्यादिश्रुतिषु भारतपुराणादिषु च प्रसिद्धमूलानि वचनानि ग्रंथविस्तरभयान्नालि-
ख्यंते ॥ शिवधर्मोत्तरे मूर्तामूर्तब्रह्मचिंतनं स्फुटं निरूपितं ॥ तानि वचनान्युदाहरिष्यामः ॥ तत्र
पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिं ॥ अंगुष्ठमात्रमचलं ध्यायेदोंकारमीश्वरं ॥ कदंबगोल-
काकारं तारारूपं व्यवस्थितं ॥ ध्यायेद्वा रश्मिजालेन दीप्यमानं समंततः ॥ ध्यायेद्वा सततं शांतं

93

वस्य मालेकरूपकं॥ प्रधानपुरुषायेतं स्थितपद्मस्थमीश्वरं॥ जपेध्यायेच्च सततमोंकारं शिवरूपिणं
वाच्यवाचकभावेन मात्रात्रयविभागतः॥ मात्रास्तिस्रः समाख्यातालास्कंदो देवी महेश्वरः॥ अका
रोकारमकारास्तिस्रो मात्राः प्रकीर्त्तिताः॥ अकाराद्ग्निगर्भवात्कुमारः परिगृह्यते॥ उकाराद्
प्यमा देवी मकारः परमेश्वरः॥ अथवाप्यप्रकारेण ब्रह्मविष्णुमहेश्वराः॥ क्रमान्मात्राः समु
द्दिष्टास्तत्परश्चार्द्धमात्रया॥ भावनामात्रगम्यत्वादचिंत्यः परमः शिवः॥ सकलं चिंतयेत्तस्मा
त्सिध्यर्थं सततं शिवं॥ अथवाप्यक्रमस्यत्वं पुरुषश्चेत्यनुक्रमात्॥ मात्रास्तिस्रः समाख्याता
शिवश्चाप्यर्द्धमात्रया॥ श्रीकंठं वरदं देवं चतुर्वेदं परं हरं॥ ध्यायमानस्य सततमैश्वर्यं सं
प्रवर्त्तते॥ केचित्त्रिस्त्यादितत्त्वानां जयमिच्छंत्यनुक्रमात्॥ अजित्वैवापरां स्वर्त्तिं सर्वं गच्छे
त्कथं मुनिः॥ सिद्धस्य वैश्वरे देवे युगपत्संप्रवर्त्तते॥ ऐश्वर्यं सर्वतत्त्वेषु लब्धस्य न संशयः॥

मनःस्थिरत्वार्थमिच्छति स्थूलध्यानमनुत्तमम् ॥ तन्नतं निश्चलीभूतं लभेत्सूक्ष्मेपि संस्थितिं
स्थिरत्वार्थं मनसः सर्वं स्थूलरूपं विचिंतयेत् ॥ नानारूपमतुलैर्भेदैर्नै तु तत्वमचेतनं ॥ यच्छिव
चिंतितं रूपं तद्ध्यानं पापशुद्धिदं ॥ मनस्थितिकरं चाशु न तु तत्वमचेतनं ॥ तस्माद्ध्येयानि सर्वा
णि त्यक्त्वा ध्यायेन्महेश्वरं ॥ तत्सिद्धौ सर्वतः सिद्धिर्नस्सर्वैः सिध्यते शिवः ॥ यदा शिवात्मकं रू
पं ध्येयस्याद्भिर्विमुच्यते ॥ तदा स शिवतां याति नान्यद्ध्यायेदतः शिवात् ॥ यद्यत्तद्दैवतं ध्या
येद्ध्यासकारणात् ॥ तत्तदीश्वररूपेणात्वं ध्यायेदधिष्ठितं ॥ मेरुसंस्थशिरो शर्वं ध्याये
द्भवमुमापतिं ॥ अग्नेरधिपतिं रुद्रं भुजंगपरनमूर्त्तिनं ॥ आकाशाधिपतिं भीममीशानं सूर्य
सत्पतिं ॥ चंद्राधिपं महादेवं पुंसां पशुपतिं पतिं ॥ अहंकारे स्मरेदीशं बुद्धौ सर्वगमीश्वरं ॥ पुंप्र
कृत्या समं शांतं ध्यायीत परमेश्वरं ॥ तत्सिद्धौ भवेत्सिद्धिर्मुने तन्मात्रपंचकं ॥ बुध्यहंकार

सिद्धस्य वशितं प्रकृतो भवेत्॥ यत्रसंस्थयेन वर्णेन शिवरूपमनुस्मरेत्॥ लक्षयेन्मनसः स्थैर्यं त
त्रध्येयं पुनः पुनः॥ शुद्धस्फटिकसंकाशं जटामुकुटमंडितं॥ प्रसन्नवदनं शांतं सर्वावयवशोभि
तं॥ सितपंकजमध्यस्थं समाधिस्थं त्रिलोचनं॥ पद्मासनस्थमचलमीषत्संवृतलोचनं
सवीजपुस्तककरं वरदाभयपाणिनं॥ द्वीपीचर्मपरीधानं मक्षमालाधरं हरं॥ प्रभाकिरणप
र्यंतं भाभासितदिगाननं॥ संसारार्णवपर्यंतं पुरुषानीकृतारणं॥ इत्थं रूपं शिवं ध्यायेत्प्रति
तं तमनुक्रमात्॥ अलंगुष्ठं वितस्तिर्वा यथा स्यान्मनसः स्थितिः॥ रूपवर्णप्रमाणं च परिक
ल्प्यात्मबुद्धितः॥ तथा ध्यायेत देवेशं यथाचित्तं स्थिरं भवेत्॥ शिवेनाधिष्ठितं यस्माज्जगत्स
र्वं चराचरं॥ स्वरूपं च शिवस्तस्मादिति ध्यानं न मुच्यति॥ प्राणायामैः स्वसंप्रहैः कुर्याद्धा
निश्चलं मनः॥ कैलाशकमीथसंस्पष्टं विस्मयमुक्तं महेश्वरं॥ उमासहायमौमथैं शारएंच

द्वारलं ब्रजेरिति व्रह्मपारान्ध्रे आत्मा शक्तिः शिवश्चेति चैतन्यमिति संस्थितं॥ उन्मनोत्तर वैशि
ष्ट्या योगाभ्यासः प्रवर्त्तते॥ षट्कोनिष्कजीवतः कर्मात्मा यमपार्जितः॥ नविधेति सदृशाशीन
र्थं गेजायते न्यतः॥ तदेवं गलितिभिर्भस्म ध्यानं यस्यास्ति योगिनः॥ स चित्तस्तदज्ञातं कदाचि
त्संसरेन्नतु॥ त्र्यंबकश्चतु बाहुः सशिवः परमेश्वरः॥ एकस्त्व महेशो वै सन्निधेति प्रकीर्त्य
ते॥ नाभिमध्यस्थितं विद्धि विद्धि विद्युत्स्फ निर्मलं॥ रविबिंबं जमानं तु कासदृशमिगलोर्वृतं॥
त्विंलये हृदिमध्यस्थं दीपिमत्सूर्यमंडलं॥ तस्य मध्यगतः सोमो वह्निश्चंद्रश्च रवो महान्॥
तन्मध्ये तु परं स्तदसं तं ध्यायेद्योगमात्मनः॥ तन्मध्ये त्विंलये देलहृस्यमाणक्रमेण तु॥
बिंदुमध्यगतो नादो नादमध्यगतो ध्वनिः॥ ध्वनिमध्यगतं तारस्तारमध्यगतो श्रुमान्॥ त
स्य मध्यगतं ब्रह्मज्ञातं तस्य तु मध्यगं॥ परं पदं तु तद्धोतं सम्यगुष्टसयोजयेत॥ जीवात्मा

८२

कायमध्यस्थस्तत्रापि देहवर्जितः॥ चक्रनासापुटस्थः सन् भुंजीत विषयान्प्रभुः॥ इत्येतं ध्या
नमार्गं तु वदंति कवयो द्विजाः॥ आत्मा शक्तिरित्यादीनामयमर्थः॥ आत्मा जीवः शक्तिर्मा
या देवात्मशक्तिमित्यादिश्रुतेः। शिवः मायाशक्तिविशिष्टो महेश्वरः मायिनं तु महेश्वरमिति
श्रुतेः॥ चैतन्यं निरुपाधिकं चैतन्यमिति इति संस्थितं ध्यानालंबनयोग्यवस्त्वित्यर्थः॥ अ
न्तरादार्थमन्तर्वर्त्तिनी वा अस्मिन्पक्षे शक्तिशब्दश्चिच्छक्तिपरः॥ अथवा आत्मा जीवः स
एव पारमेश्वरी शक्तिः शिवस्तत्पदवाच्यः चैतन्यं तत्पदं तत्त्वमुत्तरोत्तरजीवादिनिरुपा
धिकपर्यंतमुत्तरोत्तरवैशिष्ट्यादधिकारितारतम्येन निमित्तक्रमेण योग्याभ्यासः प्रव
र्तितेतस्य योगिनः पुत्रदारादिसंगराहित्यं ध्यानांगत्वेनाह निःस्पृहीभूतः कूटस्थवाच्य ८२
प्राणादिभिर्विमुक्तः निरवयव इति वा कर्मपरतंत्र आत्मा कूटात्मा स्वोपार्जितः कर्मकार्यैः



शरीरेन्द्रियादिभिः संयुक्त इत्यर्थः एकाकी पुत्रदारादिसंगवर्जित इत्यर्थः अन्यतः पुत्रदारा
दिसंगात्॥ एवं गलितिमिररूपाये ध्यानं यस्यास्ति स न बिभेतीति रवेणान्वयः सच्चित्तः बहि
र्मुखवृत्तिः सन्नित्यर्थः॥ इदानीं ध्यानालंबनस्थलं प्रत्यादि मत्तत्त्वं तुरीयमर्त्ति विद्धि हं
तुरीयप्रणवरास्यमाह त्रिभिर्ब्रह्मविष्णुरुद्रात्मका इदानीं तस्य ध्यानप्रकारमाह रविरिति
कासद्भिर्मगडोदरेति मद्भिर्मगडैरित्यर्थः वह्निः वह्निमंडलं चंद्रमंडलं तस्योपरि भाग
ताधिरवातेन व्यपरिस्थले तन्मध्ये तु आत्मा अंतरात्मा परमात्माख्यं परं सदसं योगं यो
गालंबनयोग्यं विद्धि इति वैखरीमध्यमापरापश्यंतीरूपेण चतुर्विधो ॐ मात्मको नादः॥
अत्र बिंद्वादि ज्ञातैः यथा ॐ नमोते एते विंदिरूपले विंदुमध्य इत्साहोमध्यज्ञादसान्तमंडल
परः॥ ॐ भुमानिव ॐ भुमा स्वप्रकाशो जीवस्तस्य मध्यगतं ब्रह्म तस्मिन् जीवे लया

मिरूपेण वर्तमानं प्रवेक्ष्यन् सितिविशिष्टं परमकारणं परमशिवाख्यं प्रसन्नतत्त्वमध्यगतं शांतमि
तिनिरुपाधिकं प्रत्नोच्यते ॥ अत्र नादमंडलांतर्गतत्वेन ध्येयत्वोक्त्या नादप्रणवार्थत्वं प्र
तीत्यवगंतव्यं तेन स्वप्रकाशचैतन्यमानाचाव्यानां नादमंडलध्येयत्वमुक्तमस्ति अथ बाविं
दुनादादिशब्दाः न बिंदुनादादिमंडलपराः किंतु बिंदुशब्दो वैखर्याख्यतुरीयप्रणवप
रः नादस्तदनुगततारवैखरीवस्थान्तमध्यमाख्यतुरीयप्रणवपरः ध्वनिस्तन्नादानुगत
पश्यंत्याख्यशक्तिशब्दवाच्यप्रणवपरः एवं प्रणवेनतु माख्याशक्तिरभिधीयते तारशा
रमूते ॥ परारव्यतदनुगतशांतप्रणवपरः ॥ अत्र तन्मध्यगतादिशब्दानां तदनुगतत्व
मर्थः ॥ तारमध्यगतोंऽशुमानित्यत्र तारमध्यगतत्वं ताराख्यशांतप्रणववाच्यतयाले
मानुगतत्वं ॥ अंशुमत्पदवाच्यस्य जीवस्य प्रणवस्थाभिव्यज्यमानापर्णलपापलो ८०

100

रिगुणविशिष्टस्यनियम्यत्वसंबंधेनोक्तजीवविशिष्टचिच्छक्तिविशिष्टपरमेश्वरवाचि
त्वांतमपदवाच्यत्वाविच्छक्तिपरमेश्वरयोरिवाविरुद्धा॥ अस्मिन्पक्षेननादमंडलांतर्ग
लत्वेनशांतावस्थनादवाच्यत्वमनुमेयं॥ किंतुसाक्षादेवोक्तनादवाच्यत्वंतारमध्य
गतौंकारमात्रस्यैवोक्तमितिषडक्षरमंत्रेतुपंचतुर्थ्यंतपदकंॐमितिपदनिर्दिष्टस्यप्रण
वार्थव्याख्यानात्मकपंचाक्षरीमंत्रगतोक्तप्रणवसमानाधिकरणचतुर्थ्यंतशिवपदे
ननिर्देशात्प्रणवपंचाक्षरयोरेकार्थतावगम्यते॥ अतएवनमस्तारायेतिवाक्येश्र
यमाणतारस्यप्रणववाच्यतयातद्रूपलोपस्थापकचतुर्थ्यंतपदनिर्दिष्टस्यनमःशि
वायचशिवतरायेत्यत्रचतुर्थ्यंतशिवपदेननिर्देशः॥ शिवपदंचवशकांतावितिधातोः
कांतिशब्दवाच्येच्छाशक्त्यात्मकोमायावाचकंशिवपदस्यमतत्वथरेयाऽस्यांततयोमारस्य



५१ शक्तिविशिष्टपरमेश्वरवाचित्वमपि तस्याच नित्यमित्यलमलं तथानादिमुक्तस्यनित्य
सिद्धलावण्यस्य निरवधिकल्याणगुणस्यदस्य महेश्वरस्यवाचक इति ते समानाधि
करणे ॐमिति परमपुरुषविधस्य परमेश्वरस्य वाचकमिति प्रणव पंचाक्षरयोरेका
र्थता॥ ॐमित्येतत्पदं यतोऽवयवशक्त्यासमुदायशक्त्याच प्रतिपादयत्यतः एवोंकारस्या
वयवशक्त्यापंकजादेरिव परत्वमुपपन्नं लोके योगरूढिस्वीकारात्॥ परमेश्वरे रू
ढिश्चावाचकः प्रणवो यस्यज्ञानमूर्तेरमापतेः॥ हिरण्यबाहुं जटिलमोंकाराख्यं प्रचे
तसं॥ ॐ विश्वपतिमीशानं ज्योतिषांज्योतिरव्ययमित्यादित्यपुराणादिवचनात्॥ सुप्ति
ङन्तं पदमिति वैयाकरणपरिभाषयापि पदत्वं॥ कृत्तद्धितसमासाश्चेत्यनेन समास ५१
स्यापि प्रातिपदिकसंज्ञाविधानात्॥ अत्रापि अश्वास्सोऽश्वास्सोमश्वेति कर्मधार

यांगीकारात्॥ स्वारेङ्गो सतिरूढत्वं तत्तमुपपन्नमेवत्स्फुटुं न्यारिलमात्रमूर्ध्वमुन्नामय
तीत्योंकार इति ऋत्येनुसारादवनादोमिति स्फटलइति स्फटत्यनुसाराच्च यौगिकत्वांगीका
रेपि रूढत्वं तत्तथापि प्रातिपदिकसंज्ञा॥ ओमक्षरणादिशब्दवरस्वंडशब्दत्वेप्यर्थवदधातु
रप्रत्यय इति सूत्रात्प्रातिपदिकसंज्ञायां स्फवं लत्वं॥ अवलेर्धातोरवतेष्टिलोपश्चेति
मप्रत्यये टिलोपे च कृते ज्वरत्वरेति सूत्रेण ऊठि सवर्णदीर्घे गुणे च कृते ओमिति न
वत्यलोथे विभक्त्या स्वाद्युत्पत्तौ सन्नोजं ल इत्यव्ययत्वात्सुपा लुक्योमिति पदं भवत्य
वति धातोरर्थो व्याकरणसूत्रेभ्यः यले॥ अव रक्षणगतिप्रीतितृप्त्यवगमकांतिप्र
तिष्ट॥ श्रवणस्वाम्यसमृद्धि-वक्रक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादहनभाववृद्धिषि
तिरक्षकत्वं च स्वजयपराजयणां स्वस्मिन्नलीकेम स्नानेदेनोपास्य कानां च ज्ञानद्वारेण

103

मोक्षहेतुत्वात् ॥ ॐमिति इदं सर्वमिति श्रुत्या प्रणवस्य सर्वात्मकतया प्राणविछिंद्र मनुराज
५२ पित्राख्यात्मना गोप्तृत्वात् प्रणवस्य सर्वात्मत्वं सर्वात्मब्रह्मवाचकत्वेन वाच्यवाचकयोराहार्या
भेदाध्यासात्तथा ओंकारप्रभवा वेदाः ॐकारप्रभवाः स्वराः ॥ ॐकारप्रभवं सर्वं त्रैलो
क्यं सचराचरं इति स्मृतौ श्रूयमाणं जगत्कारणत्वं जगत्कारणपरमेश्वराभेदविवक्ष
यैव द्रष्टव्यमेवं प्रणवस्य प्रयोगभेदेन देवताभेदो ऋषिछंदोविनियोगाश्च श्रूयंते शौन
ककल्पे प्रारंभे कर्मवेदानां विश्वेदेवास्त्रिमात्रकाः ॥ जपस्वाध्यायहोमेषु त्रिमात्रो वह्नि
देवतः ॥ अर्द्धमात्राधिको ध्याने परं ब्रह्मैव देवता ॥ ऋषयो देवताश्चैव ब्रह्मविष्णुशिवाः
स्मृताः ॥ छंदांसि चास्य वर्णानां गायत्रं त्रैष्टुभं जगत् ॥ प्राणसंयमने मोक्षे प्रारंभे चैव ५२
दकर्मणां ॥ जपस्वाध्यायहोमेषु ध्याने च विनियोजनं ॥ तत्र व्यस्तसमस्तोयं प्रणवो

104

ब्रह्मपुत्रकः ॥ भूर्भुवस्वस्तथा ब्रह्मदेवेनं तस्य विदुर्बुधा इति ॥ ओंकारेण परमात्मप्रतिपत्तिप्रकारः शौनककल्पस्य एव कथ्यते ॥ अकारः पीड्यमानः सन् उकारं प्रतिपद्यते ॥ उकारः पीड्यमानः सन् मकारं प्रतिपद्यते ॥ अर्द्धमात्रां मकारोपि पीड्यमानः प्रपद्यते ॥ अर्द्धमात्रापि विलयं याति अमात्रे निराश्रये ॥ यः शब्दमय ओंकार उच्चार्यः स्थूल एव सः ॥ अमात्रो यो न तूच्चार्यः स ओंकारः परो मतः ॥ निर्गुणा योगगम्यासा यातेमात्रात्र संस्थिता ॥ यदा प्रयुक्त ओंकारः परिश्रिवाति मूर्द्धनि ॥ तदोंकारमयो योगी स्वक्षरे त्वक्षरी भवेत् ॥ पीड्यमानः लीयमान इत्यर्थः ॥ ननु वर्णानां नादप्रकृतिकत्वादकारउकारमकाराणां परस्परप्रकृतिविकारभावाभावात्कथं मकारादीनामुकारादौ लय इति चेन्न ॥ उदात्तवच्चनान्मात्रामात्रेति श्रुतेश्च नादो मकारप्रकृतिरित्यंगीकारे विरोधाभावात् ॥

प्रणवस्य द्वादशावस्थाप्रासादपंचाक्षरीमंत्रयोरुच्चारस्थानिरूप्यंते प्रणवस्योच्चारः पंचवि
५३ धः ह्रस्वदीर्घप्लुतसूक्ष्मातिसूक्ष्मभेदेन ह्रस्वोच्चारो बिंदुतः अर्द्धेंदुतो दीर्घोच्चारः।। निरो
धिन्यंतः प्लुतोच्चारः सूक्ष्मोच्चारो नादांतः अतिसूक्ष्मोच्चारो व्यापिन्यंतः प्रणवमंत्रस्य
ह्रस्वोच्चारेण ब्रह्मविष्णुरुद्रेंद्राणां त्यागस्तत्र समकारस्य रुद्रवाचकस्य वाच्यभूतेन रुद्रे
ण तालुमध्ये त्यागः प्रणवमंत्रस्य दीर्घप्लुतोच्चाराभ्यामीश्वरत्यागः बिंदोरीश्वरवाच
कस्य वाच्यभूतेनेश्वरेण भ्रूमध्ये त्यागस्तत्रैवार्द्धचंद्रनिरोधिन्योरंतर्भावः प्रणवस्य
सूक्ष्मातिसूक्ष्मोच्चाराभ्यां सदाशिवत्यागः नादस्य सदाशिववाचकस्य नादीतस्य वा
च्यभूतेन सदाशिवेन सहब्रह्मबिले त्यागस्तत्रैव शक्तिव्यापिन्योरंतर्भावः ब्रह्मबिलो ५३
पर्येकांगुलमानेन शक्तिस्थानं तदूर्ध्वं त्र्यंगुलमानेन व्यापिन्यास्थानं व्यापिनीपर्यंतं

सदाशिवव्याप्तिः एवमोमित्यादिमन्त्रस्यार पर्यंतेन ब्रह्मादिपंचकारणेश्वराणां त्यागः ॐ
मेणस्तत्त्विलोभनवलिव्योमव्यापी परं ओमेतिव्यापिन्तु परिच्छिन्नत्तुरं गुमानेन समानस्थेनानु
स्यतेलब्धाप्नोतीति व्योमव्यापी अनाहतः शिवस्तस्माद्व्योमव्यापिनः परं परिवर्त्तमानमने
नानाहतः शिवः सच्चित्तस्तदापरमशिवो मनस्पंद इति प्रणवमंत्रोच्चारत्यागेनोन्मनी
रूपेण प्रणवेन द्रष्टव्यस्तथा श्रुतिः वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः
कूटस्थाः ॥ ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे इति अत्र वेदशब्दे
न प्रणवः ॐ एवं ब्रह्म एवं पुराणमिति प्रसूत्य वेदोयं ब्राह्मणा विदुर्वेदेनेन यद्वेदितव्य
मितिश्रुतेः ॥ अत्र तच्छब्देन नादस्तद्विज्ञानगम्योऽर्थो यैः सुनिश्चितस्ते वेदांतविज्ञानसु
निश्चितार्था यतयो जितेन्द्रियाः शुद्धसत्वादीक्षानिर्मलात्मानः ब्रह्मलोके ब्रह्मविले

सदाशिवभुवनेतुरत्नघरणार्थः रत्नकुसुमगालाश्चसदाशिवमनुभितिलद्भुवनेस्थित्वापरं
५४ तत्कालेपरायाउन्मन्याअंलकालेलयकोटेसन्यासयोगारकाराधिष्ठातॄणांस्वस्वकारे
लेलयन्यकूदरेपः सन्यासस्ययोगात्परामन्दलापरमशिवशानात्मचात्मानंशिवेसंयोज्यपरिलो
मुन्यपितिस्यसारान्मुन्यंलेशिवत्वंयातीत्यर्थः॥ नस्यादिवार्यरूपाणिस्वेस्वेसंहृत्यकारणे॥ मुक्त
वित्तस्तदाशानंशिवेसंयोजयेत्परइलियाक्षवत्स्वयः॥ एताद्वादशावस्थाः स्वच्छंदेहृशिताः
अकारश्चउकारश्चमकारोविंदुरेवच॥ अर्द्धचंद्रोनिरोधीचनादोनादांतएवच॥ शक्तिश्च
व्यापिनीचैवसमनैकादशस्मृता॥ उन्मनाचततोनीतंतदृतीतंनिरामयमितिशास्त्रोक्त ५४
मात्राकालतारतम्यक्रमेणोच्चार्यमाणप्रणवावस्थाविशेषानस्यमाणलत्तमदेवासंबंध
निबंधनामंत्रशास्त्रीयव्यवहारशिद्धयेनिर्दिश्यंतेअर्द्धचंद्रादिशब्दैः॥ आदैवैवव्याकर

एज्ञात्वा यत्त्ववहार द्विाद्वयेत्छिन्नादेन अकारश्च उकारश्च मकारो बिंदुरेव च ॥ अर्द्धचंद्रो निरो
धीन्व नादो नादांतलएव च ॥ शक्तिश्च व्यापिनी चैव समनैकादशा स्मृता ॥ उन्मना तु ततो लीतालद
ली लं निरामयमिति अस्यायमर्थः ॥ कंठ मूलात्मक विशुद्धस्थान संबंधि अकारः भ्रूमध्या
त्मक आज्ञास्थान संबंधि उकारः ललाटोपरि केशारंभदेशा अर्द्धेन्दुस्तत्संबंधी मकारः नि
रोधिकालस्योपरि प्रदेशास्तत्संबंधी बिंदु आगमांतरेषु केशारंभदेशो निरोधिकालदुपरि
देशो अर्द्धेन्दुरिति अथ तेलस्मिन्निरोधिकास्थानएव बिंदोरंतर्भावस्तदुपरि नादस्था
नएव कुलपदस्थानस्यांतर्भावस्तदुपरि नादांतस्थानं तदुपरि शक्तिस्थानं तदुपरि व्यापि
नीस्थानं तदुपरि समानास्थानं तदुपरि उन्मनीस्थानं तदुपरि निरामयं तदेव ध्रुवमंडल
मित्युच्यते यत्रार्द्धमात्रासंबंधि सोमकलोक भावनां कृत्वा सांबः परमेश्वरो ध्येयः नादएव



५९ विंदुस्थानातिरिक्ततन्मात्रकतत्संस्थानेषु संबध्यमानो नादनादांतशक्त्यादेस्तत्स्थले तथा च प्रणव
स्यततंतूच्चारणभेदेन व्यज्यमानस्य बिंदुद्वारिनिरामयरूवमंडलादिवाद्यशांतितद्वादशी
स्थानेषु अकारादिस्वावयवद्वारा संबध्यमानस्य द्वादशविधत्वमुक्तमितिद्रष्टव्यं ॥ तत्रस्थे
मोक्षस्थादिक्रमत्वक्रमतः सांबमूर्तिधरः शिवस्तथा च योगयाज्ञवल्क्ये अस्मिन्नर्थे वदंत्यन्य
योगिनो ब्रह्मवादिनः ॥ प्रणवेनैव कार्याणि स्वेस्वे संहृत्य कारणे ॥ प्रणवस्य तु नादांते पर
मानंदविग्रहं ॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ॥ चेतसा संप्रपश्यति संततः संसार
भेषजं ॥ तं तस्मात्प्रणवेनैव प्राणायामैस्त्रिभिस्त्रिभिः ॥ ब्रह्मादिकार्यरूपाणि स्वेस्वे संहृत्य ५९
कारणे ॥ विशुद्धचेतसा पश्यन्नादांते परमेश्वरं ॥ तथा योगेवाशिष्ठे त्वादनीयं मकारांते
बिंदुरूपं प्रदृश्यते ॥ बिंदोस्तु परिधिभ्राद्रश्मिः शुद्धस्फटिकसन्निभः ॥ विशुद्धचेतसः शान्तेस्व



ममेव प्रकाश्यते ॥ असौ विश्वाधिको रुद्रो महर्षिः कृष्णपिंगलः ॥ ऊर्ध्वरेता विरूपाक्षस्तिष्ठती स्या
द्दूरागमा ॥ आगमान्तैकसंवेद्यो रुद्र एव न चापरः ॥ तमागमान्तसंवेद्यममृतं कृष्णपिंगलं ॥
संद्रष्टुमिछतस्तस्य ऋषिरोंकार एव हि । ॐकारो वाचकस्तस्य वाच्यो रुद्रो घृणानिधिः ॥ ना
दोपरि महादेवं पश्यंति ज्ञानचक्षुषा ॥ तथा व्यासादयो ये पि ते शुद्धाः प्रणवाक्षरे ॥ चेतसा सं
प्रपश्यंति नादांते वृषभध्वजं ॥ न्यस्तमंत्रतनुर्धीरः सितभस्मावगुंठितः ॥ तत्रांतरे च कार्याणि
त्यक्त्वा संहृत्य कारणं ॥ विष्णोः पदेव परमे चक्षुभिश्च समन्वितः ॥ चित्तं विधाय योगींद्रो देहे स्मिन्ब्र
ह्मणः पुरे ॥ गुहायां च स्थितं रुद्रं परमानंदविग्रहं ॥ गुहाप्रविष्टममृतं तारकेण जपेत्सदा ॥ स
कालं समतिक्रम्य दीर्घायुर्भुक्त्यं विंदवे दिति अयमेव परमेश्वरस्त्रेधा प्रणवविभागपक्षे मका
रेण वा अकारेण वा भी धीयते तदुक्तं सारसंग्रहे अकारः पुरुषस्तत्र हकारः प्रकृतिर्मता ॥ तथा
प्रणवगाकारो बीजात्मा पुरुषः स्मृतेः ॥ उकारः शक्तिरूपत्वात्प्रकृतिः स्याद्द्विरूपिणी ॥ पुंप्रकृत्यात्मका

५६ वर्णास्तस्माद्दोमध्यगाः सदाः ॥ क्षराक्षरपरो देवो मकारः परमेश्वरः ॥ अथवाकार एवायं त्रिमा
त्रः परमेश्वर इति अत एव श्रुती भवतः ॐकाररथमारुह्य विष्णुं कृत्वान सारथिं ॥ ब्रह्मलो
कपदान्वेषी रुद्राराधनतत्परः ॥ तावद्रथेन गंतव्यं यावद्रथपथास्थितिः ॥ स्थित्वा रथपथ
स्थानं रथमुत्सृज्य गच्छति ॥ मात्रालिंगपदं त्यक्त्वा शब्दव्यंजनवर्जितं ॥ अस्वरेण मका
रेण पदं सूक्ष्मं हि गच्छतीति अह इति ब्रह्मणो नाम तत्त्वामल महमिति ॥ मकारोकारकृति
तः परमात्मा महेश्वरः ॥ आदिसंतलर्गलो देवैः कालकालो महाविभुः ॥ सर्वसंहारवन्हात्मासा
क्षाच्चिन्मात्रविग्रहः ॥ पुरुषः पंचविंशोयं षड्विंशश्च महेश्वरः ॥ पंचविंशात्मना भोक्ता षड्विंशो ५६
भोजको मतः ॥ तुर्य आत्मा मकारोयं प्रणवस्थ उदाहृत इति वायुपुराणे पाशुपतयोगप्रस्ता
वे श्रूयते प्रकृतिमहदहंकारविषयक योगिनामणिमादिसिद्धिमुत्का मुमुक्षुभिर्ध्येयः स

सन्वक्कद्स्याकांक्षायां विदित्वा सप्तसूक्ष्माणि षडंगं च महेश्वरं॥ प्रधानविनियोगज्ञः परंब्रह्मा
धिगच्छति सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः॥ अनंतशक्तिश्च विभोर्वि
धिज्ञाः षडाहुरंगानि महेश्वरस्य इत्येताभ्यां श्लोकाभ्यां ध्येयः परमेश्वर इति निरूपितं तत्र
ध्यानेयमलियमादिकमंगमित्युक्तास्तल्लोपे च प्रायश्चित्तं चोक्तं तदुक्तरीत्या ध्येयपरमेश्वरध्या
नांगत्वेन प्रणवो विधीयते तन्मात्रा विभागश्च तन्मात्रज्ञानपूर्वकं प्रणवध्यानात्फलं प्रण
वेन तदुपासकस्य फलेः निरस्तध्येयं परमेश्वरोपस्थानं तदंगमंत्राश्च विरूप्यंते तानू श्लोका
नुदाहरिष्यामः॥ अथोंकारमयो योगी नक्षरे त्वक्षरी भवेदिति प्रथमाध्यायांते श्लो॥ अत
ऊर्ध्वं प्रवक्ष्यामि तारं कारणलक्षणं॥ परमकारणं परब्रह्म शिवाख्यमनेन तारेण प्रणवेन
तस्य तदितिकारणलक्षणं ष त्रिमात्रो विश्लेयोऽव्यंजनं मात्रे सस्वरं प्रथमा वैद्युता मात्रा द्विती
या तामसी स्मृता॥ तृतीयां निर्गुणीं विद्यान्मात्रामक्षरगामिनीं॥ गांधर्व इति च विज्ञेया गां

113

५८ पारस्वरस्य भवा॥ पिपीलिकासमस्पर्शा प्रयुक्ता मूर्ध्नि लक्ष्यते॥ तथा प्रयुक्तमोंकारं प्रति
निर्भाति मूर्द्धनि॥ तथोंकारमयो योगी नक्षरे ह्यक्षरी भवेत्॥ प्रणवो धनुः शरो ह्यात्मा ब्रह्म
तल्लक्ष्यमुच्यते॥ अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥ ओंमित्येकाक्षरं ब्रह्म गुहायां
निहितं पदं॥ ओंमित्येतत्त्रयो वेदास्त्रयो लोकास्त्रयोऽग्नयः॥ विष्णुर्ब्रह्मा शिवस्त्वेते ऋक्सा
मानि यजूंषि च॥ मात्रोऽर्धात्र च तस्य स्तु विज्ञेया परमार्थतः॥ तत्र युक्तस्तु यो योगी तस्य सा
लोक्यतां व्रजेत्॥ अकारस्त्वक्षरो ज्ञेय उकारः स्वरितः स्मृतः॥ मकारस्तु प्लुतो ज्ञेयस्त्रिमा
त्र इति संज्ञितः॥ अकारस्त्वथ भूर्लोक उकारो भुव उच्यते॥ सव्यंजनो मकारश्च स्वर्लोकश्च
विधीयते॥ ओंकारस्त्रयो लोकाः शिवस्तस्य त्रिविष्टपं॥ भुवनांतं च तत्सर्वं ब्राह्मं तत्पद ५८
मुच्यते॥ मात्रापदं रुद्रलोको ह्यमात्रस्तु शिवं पदं॥ एवं ध्यानविशेषेण तत्पदं समुपास

ते॥ तस्माद् ध्यानरतिर्नित्यममात्रं हि तदक्षरं॥ उपास्यं हि प्रयत्नेन शाश्वतं परमिच्छता॥ ह
स्वा तु प्रथमा मात्रा ततो दीर्घस्वनंतरं॥ ततः प्लुतवती चैव ततीयाउपदिश्यते॥ एतास्तु मा
त्रा विज्ञेया यथावदनुपूर्वशः॥ यावच्चैव तु शक्यंते धार्यंते तावदेव हि॥ इंद्रियाणि मनोबुद्धि
ध्याय आत्मनि यः सदा॥ अर्द्धमात्रामपि वरेच्छ्णुयात्फलमाप्नुयात्॥ मासे मासे श्वमेधे
न यो यजेत शतं समाः॥ न स तत्प्राप्नुयात्पुण्यं मात्रया यदवाप्नुयात्॥ अबिंदुं यः कुशाग्रे
ण मासे मासे पिबेन्नरः॥ संवत्सरशतं पूर्णं मात्रया तदवाप्नुयात्॥ तत्रैकार्द्धमात्रीयः
प्लुतो नामोपदिश्यते॥ एषा एव च वेत्ता यो गृहस्थानां तु योगिनां॥ एतदेव विशेषेण ऐश्वर्य
समलक्षणा॥ एवं हि योगी संयुक्तः शुचिर्दांतो जितेंद्रियः॥ आत्मानं विंदते यस्तु स सर्वं
विन्दते द्विजः॥ ऋचो यजूंषि सामानि वेदोपनिषदस्तथा॥ योगध्यानादवाप्नोति ब्राह्मणो

115



ते॥ तस्माद्ध्यानरतिर्नित्यममात्रं हि तदक्षरं॥ उपास्यं हि प्रयत्नेन शाश्वतं परमिच्छता॥ ह
स्वा तु प्रथमा मात्रा ततो दीर्घा ह्यनंतरं॥ ततः प्लुतवती चैव तृतीया उपदिश्यते॥ एतास्तु मा
त्रा विज्ञेया यथावदनुपूर्वशः॥ यावच्चैव तु शक्यंते धार्यंते तावदेव हि॥ इंद्रियाणि मनो बुद्धिं
ध्यायन्नात्मनियः सदा॥ अर्द्धमात्रामपि वरेच्छृणु यःफलमाप्नुयात्॥ मासे मासेश्वमेधे
न यो यजेत शतं समाः॥ न स तत्प्राप्नुयात्पुण्यं मात्रया यदवाप्नुयात्॥ अबिंदुं यः कुशाग्रे
ण मासे मासे पिबेन्नरः॥ संवत्सरशतं पूर्णं मात्रया तदवाप्नुयात्॥ तत्रैकार्द्धमात्रो यः
प्लुतो नामोपदिश्यते॥ एषा एव च वेत्कार्यगृहस्थानां तु योगिनां॥ एतदेव विशेषेण ऐश्वर्यं
समलक्षणं॥ एवं हि योगी संयुक्तः शुचिर्दान्तो जितेन्द्रियः॥ आत्मानं विंदते यस्तु स सर्वं
विन्दते द्विजः॥ ऋचो यजूंषि सामानि वेदोपनिषदस्तथा॥ योगज्ञानादवाप्नोति ब्राह्मणो

115

ध्यानचिंतकः॥ सर्वभूतलयो भूतात्मा भूतः स तु जायते॥ योगी संक्रमणं कृत्वा याति वैशाश्व-
५८ तं परं॥ अपि चान्नकृतं स्येतां ध्यायमानस्य तु मुखं॥ पठंती लिङ्गोपः प्रकृतिं विश्वरूपाख्यां
हृद्ग्राहिच्येन चक्षुषा॥ अजामेतां लोहितशुक्लकृष्णां बह्वीः प्रजास्तत्र मनः स्वरूपं॥ अजामे-
कां जुषमाणो नु भूते जहात्येनां भुक्तभोगामजोन्यः॥ अष्टाक्षरां षोडशपाणिपादां चतु-
र्मुखीं त्रिशिखां त्रिशृंगी॥ आद्यामजां विश्वसृजां सरूपां ध्यात्वा बुधास्त्वमृतत्वं व्रजंति॥ ये
ब्राह्मणाः प्रणवं वेदयंते न ते पुनः संसरंतीह भूयः॥ इत्येवमक्षरं ब्रह्म परमोंकारसं-
ज्ञितं॥ यस्तु वेदयते सम्यक् तथा ध्यायंति वा पुनः॥ संसारचक्रमुत्सृज्य मुक्तबंधनबं- ५८
धनः॥ अचलं निर्गुणं स्थानं शिवं प्राप्नोत्यसंशयं॥ इत्येतद्वै मया प्रोक्तमोंकारप्राप्तिल-
क्षणं॥ नमो लोकेश्वराय सेंद्रत्यल सरणाय महांतमुपतिष्ठेत तद्धोहि लं यद्ब्रह्मणे नमः॥

116

सर्वमस्थानि नेमिर्गुणा य असंसक्त योगीश्वरा मपुष्करपर्णमिवाद्भिः ऊर्ध्वं अस्य मुपलिष्ठेत ॥
पवित्रं पवित्राणां पवित्रं पवित्रेऽपरिहलं पवित्रेऽङ्कु स्वदीर्घप्लुतमिति लदेतदोङ्कार मङ्गल्य
मस्पृश्यमित्यूपमरसमगंधं पर्युपासीत ॥ अविघेशानाय नमो योगीश्वराय लेखेन योस्या
ष्टविवीच इगये न लुब्धस्तपितं येन नाकः ॥ लयोरंतरी काइमे दवीयसो देवानां हृदयं विश्व
रूपो न तस्य प्रमाणं नोपमन्यचास्ति ॐकारो विश्वो विश्वो वै यइः । यश्चो वैवै रो वेदो वै नमस्का
रः नमस्कारो रुद्रः नमो रुद्राय योगीश्वराधिपतये नमो नम इति सिद्धस्य स्वरूपस्थान
सायं प्रातर्मध्याह्ने नमइति सर्वकामफलो रुद्रः ॥ यथा ह्रतो फलं पक्वं पवनेन समीरितं ॥
नमस्कारेण रुद्रस्य तथा पापं प्रणश्यति ॥ यथा रुद्रनमस्कारः सर्वधर्मफलो ध्रुवः ॥ अ
न्यदेवनमस्कारो न तत्फलमवाप्नुयात् ॥ तस्मात्त्रिषवणं योगी उपासीत महेश्वरम् ॥

५९ दृशाविस्तारकं प्रस्तलथाच प्रसविस्तरं ॥ ॐकारं सर्वतः काले सवैविहितवान्प्रभुः ॥ लेनतेन
लुविस्तुतं नमस्कारं महायशाः ॥ नमस्कारस्तथा चैव प्रणवस्तवले प्रभुं ॥ प्रणवं स्तवलेय
शोयशंसंस्तवते नमः ॥ नमस्तवति वैरट्टं तस्माहट्रपदं शिवः ॥ इत्येतानि रहस्यानि यती
नोरै यथाक्रमं ॥ यस्तवैरयते ध्यानैसपरं प्राप्नुयात्परं ॥ केशाकूमस्विसंघटे नियमुक्तं महे
श्वरं ॥ उमासहायमोमर्चं शारदयशारडांवजेलर ॥ जावनोंनिर्णया रत्येषा श्रीमतिपुण्यमाक्ति
का ॥ श्रीविश्वेशपरांजोजे मया जन्न्यासमर्पिता ॥ इतिश्रीपरमहंसपरिव्राजकाचार्यश्री
महास्फूर्देवेन्द्रसरस्वतिपुज्यपादशिष्य श्रीमाप्रणेंद्रसरस्वतिरलेप्रस्तुभावनानिर्णयः स
माप्तः ॥ कालिंद्यांकलिकायोगेयः कुर्यात्स्वामिदर्शनं ॥ कोटिजन्मभवेद्विमोक्षमाद्योवेद ५९
पारगः ॥ श्रीस्वेष्टदेवतागुरुरूपायनमोनमोस्तु ॥ श्रीराजराजेश्वरार्पणमस्तु ॥ छ ॥

KKSU LIBRARY
RAMTEK
441 106
M-1782
Dist. Nagpur

```
[OrderDescription]
,CREATED=01.07.20 15:07
,TRANSFERRED=2020/07/01 at 15:30:48
,PAGES=119
,TYPE=STD
,NAME=S0003243
,Book Name=M-1782-BRAHAMANBHAVANA NIRNAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
```

```
FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
```

```
FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
```

```
FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
```

```
FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,
```